दैनिकम् ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ता

पञ्चाङ्गम्
वि.सं. २०८३,
कलियुगाब्धः ५१२७ वर्षा-ऋतुः
सूर्यः दक्षिणायनम् श्रावणशुक्लचतुर्दशी पूर्णिमा
भाद्रपद 11 प्रविष्ठांशः मङ्गलमयः भवेत्

■ पृष्ठ-10 ■ वर्ष-5 ■ अङ्क-308 | 1 | अगस्त 27, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

2 आगामि-शैक्षणिकसत्रात् प्रवेशपत्रे न भविष्यति जातेः कोष्ठकः, मुख्यमन्त्रिणा सुक्खू-महोदयेन दत्ताः निर्देशाः

4 सी एस यू रणवीर-परिसरे भव्य-संस्कृत- शोभा-यात्रायाः समायोजनम्

8 रक्षाबन्धनस्य शास्त्रीयस्वरूपम् आधुनिकसन्दर्भे तन्महत्त्वञ्च

## नेपाल-देशे आकस्मिक-आप्लावेन

## चतुरशीत्यधिकत्रिशतपर्यटकाः विलीनाः, यत्र शताधिक-भारतीयाः संदिग्धाः



हिमसंस्कृतवार्ता। नेपालस्य आप्लावेन गण्डक नद्याः जलस्तर वृद्धेः आशङ्कां विलोक्य बिहार-राज्येन जलप्लावन-सज्जता तीव्रीकृता; गृहमन्त्रिणा अमित शाहेन सर्वविधसहायतां प्रदातुं दृढाश्वासनं दत्तम्। नेपाल-देशस्य रसुवा-क्षेत्रे भोटे-कोशी-नद्याम् आगतेन आकस्मिक-जलाप्लावेन महती विभीषिका सञ्जाता, यत्र शताधिकान् भारतीय पर्यटकान् समेत्य चतुरशीत्यधिक-त्रिशतं पर्यटकाः विलुप्ताः । नेपाल पर्यटन परिषदः अनुसारं विलुप्तेषु चतुरशीत्यधिकत्रिशतं पर्यटकेषु एक-नवत्यधिक-द्विशतं वैदेशिक-नागरिकाः अथ च त्रिनवतिः नेपाली नागरिकाः सन्ति । वैदेशिकेषु भारतस्य पञ्चाधिकशतं पर्यटकान् अतिरिच्य ब्रिटेन ऑस्ट्रेलिया-अमेरिका-मलेशिया-दक्षिणअफ्रीका-नीदरलैण्डदेशानां नागरिकाः सम्मिलिताः। पर्यटन-मण्डलेन स्पष्टीकृतं यत् एते अङ्काः प्राथमिकाः सन्ति सहैव यात्राभिकरणैः स्थानिक प्रशासन-संस्थाभिः सह तेषां प्रमाणीकरणं क्रियमाणम् अस्ति। जलप्लावेन रसुवा-क्षेत्रे व्यापकः विनाशो जातः, येन पर्यटकानां सुरक्षां विषयीकृत्य गम्भीर-चिन्ता उत्पन्ना।

प्रधानमन्त्रिणा नरेन्द्र-मोदिना नेपाल-प्रधानमन्त्रिणा बालेन्द्र-साहेन सह वार्ता विहिता, शोक-संवेदना व्यक्ता, मानवीय सहायतायै च आश्वासनं दत्तम् ।

प्रधानमन्त्री नरेन्द्रमोदी स्वकीय-नेपाल-समकक्षेण प्रधानमन्त्रिणा बालेन्द्र साहेन सह दूरभाष-माध्यमेन वार्ताम् अकरोत्, अथ च नेपाल-देशे जलप्लावेन सञ्जातायां जन-धन-हानौ गभीरं दुःखं च प्राकटयत् । प्रधानमन्त्री मोदी सामाजिक-सञ्चारपटले अलिखत् यत् अस्मिन् संकटकाले भारतस्य जनाः नेपाल-देशेन सह स्थिताः। सः असूचयत् यत् भारतं नेपाल-देशाय सर्वसम्भवं मानवीय-सहाय्यं प्रदातुं पूर्णतया सज्जं वर्तते। प्रधानमन्त्रिणा प्रतिपादितं यत् उभयोः देशयोः समुद्धरणदलानि मिलित्वा रक्षणकार्याणि कुर्वन्ति ।

नेपालस्य आप्लावेन गण्डक नद्याः जलस्तर-वृद्धेः आशङ्कां विलोक्य बिहार-राज्येन जलप्लावन-सज्जता तीव्रीकृताः गृहमन्त्रिणा अमित शाहेन सर्वविधसहायतां प्रदातुं दृढाश्वासनं दत्तम्।

नेपाल-देशे सञ्जातेन आकस्मिक-जलाप्लावेन अथ च गण्डक नद्याः जलस्तरे आकस्मिक-वृद्धेः सम्भावनया बिहार-सर्वकारेण जलौघ-पूर्वसज्जता तीव्रीकृता। राज्यस्य षट् जनपदाः पश्चिमचम्पारण-पूर्वचम्पारण-गोपालगञ्ज-सारण-मुजफ्फरपुर-वैशाली चेत्यादयः उच्च-सतर्कतायां स्थापिताः सन्ति। अपरत्र सीतामढी शिवहर-सहितानाम् अन्येषां जनपदानां मण्डलाधिकारिणः अपि स्थितेः उपरि निरन्तरं सूक्ष्मेक्षिकया दृष्टिं स्थातुं निर्दिष्टाः। पश्चिम चम्पारण-मण्डलस्थे बगहा-क्षेत्रे अथ च वैशाली-मण्डले निम्न-भूमि-क्षेत्रेषु निवसन्तः जनाः शीघ्रतया सुरक्षित-स्थानानि प्रति प्रस्थातुम् निवेदिताः।

गण्डक-नद्यां जलप्रवाह-वृद्धेः सम्भावनां विलोक्य एनडीआरएफ-दलं गोपालगञ्ज बेतिया-नगरे च नियोजितम् । मुख्यमन्त्री सम्राट चौधरी अवदत् यत् स्थितेः सूक्ष्म निरीक्षणार्थम् एका उच्च-स्तरीय समितिः गठिता वर्तते।

### देशे प्रसृत्यमानान् इन्फ्लुएंज़ा-प्रकरणान् विलोक्य आई. एम. ए. संस्थया स्वास्थ्य-संचेतना प्रख्यापिता

भारतीय-चिकित्सक-सङ्घेन एच-वन-एन-वन इति इन्फ्लुएंज़ा-विषाणोः प्रसारे सावधानेन भवितुं जन-साधारणम् अभ्यर्थितम्। संघेन उक्तं यत् सङ्क्रमणानां प्रभावः सौम्यः तथा स्वयमेव शम्यमानः अस्ति, अतः भये क्षोभे वा न कोऽपि हेतुः अस्ति। संस्थया विशेषतः अजिथ्रोमाइसिन्, अमोक्सीसिलिन्-क्लैवुलैनेट् तथा सेफिक्सिम-सदृशानाम् एन्टीबायोटिक्-औषधीनां स्वेच्छया सेवने सावधानतया वर्त्तितुं संचेतना दत्ता। संघस्यानुसारं केवलं योग्य-चिकित्सकस्य परामर्शेन एव एतादृशौषधानि ग्रहीतव्यानि सन्ति।

## अद्यतनीयं सुभाषितम्

**मुकुटे रोपितः काचश्चरणाभरणे मणिः।**
**न हि दोषो मणेरस्ति किन्तु साधोरविज्ञता॥**
(हितोपदेश, सुहृद्भेद- ७३)

अर्थात्- यदि मुकुट में कांच जड़ दिया जाए और चरण के आभूषण में मणि जड़ दिया जाए तो यह मणि की निन्दा नहीं है पर जड़ने वाले की मूर्खता समझी जाती है।

हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता १०० ₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263
कार्यालयः, हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११ कार्यालीयः सम्पर्कः- शिवानी शर्मा 7876636263
सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति
संपादकगणः- डॉ.अमनदीपशर्मा, डॉ.मनोज शैलः, डॉ.अमित शर्मा, डॉ.नरेन्द्रराणा,
प्रचारगणः- जगदीश डाभी, शिवा शर्मा, वत्सदेसराजः, डॉ.पद्मनाभः, डॉ.अभिषेकशर्मा

## तीव्र-नगरीकरणेन प्राविधिक-क्रान्त्या च भारतस्य संरचनात्मकं रूपान्तरणं जायमानम् अस्ति - निर्मला सीतारमण



केन्द्रीय-वित्तमन्त्री निर्मला सीतारमण प्रावोचत् यत् भारतं विश्वस्मिन् तीव्रतम-गत्या प्रवर्धमाना प्रमुखार्थव्यवस्था वर्तते सहैव अत्र निरन्तर विकासः, वर्धमानः उपभोगः, सुदृढ पूञ्जी-विपणि-तन्त्रं चेत्येतेषाम् अद्वितीयं संयोजनं दृश्यते। कनाडा-देशस्य टोरण्टो-नगरे भारतीय-व्यापार-समुदायस्य प्रमुख सदस्यान् सम्बोधयन्ती श्रीमती सीतारमण अवदत् यत् भारतस्य एतत् रूपान्तरणं संरचनात्मकम् अस्ति, यत्तु तीव्र-नगरीकरणेन, वर्धमानेन मध्यमवर्गेण, विश्वस्तरीय-डिजिटल-मूलभूत संरचनया च प्रेरितम् अस्ति। सा न्यवेदयत् यत् एते विकासाः अर्थव्यवस्थायाः प्रायः सर्वेषु क्षेत्रेषु नूतनावसरान् सृजन्ति। वित्तमन्त्रिणा वित्तीय-वाणिज्यिक-सेवायां क्रान्तिकारी-परिवर्तनम् आनेतुं भारतस्य डिजिटल पारिस्थितिकी-तन्त्रस्य भूमिका अपि प्रतिपादिता। सा केवलं परिशोधन-क्षेत्रे एव न, अपि तु आगामि-वंशस्य डिजिटल-वित्तीय-संरचनायाः निर्माणे कनाडा-देशस्य अधिकोषैः फिनटेक-समवायैः, नियामकाङ्गैः च सह सहकार्यस्य महत्त्वपूर्णावसरान् प्रतिपादितवती । केन्द्रीय-मन्त्री निर्मला सीतारमण द्विपक्षीय व्यापारस्य, निवेश-सम्बन्धानां, वित्तीय-सहयोगस्य च सुदृढीकरणार्थं चतुर्दिवसीय-सर्वकारीय-यात्रायै टोरण्टो-नगरं सम्प्राप्ता।




## अस्मिन् एव सप्ताहे यू.जी.सी.-नेट्, सी.एस.आई.आर.-नेट् तथा आई.सी.ए.आर. परीक्षाणां अन्तिम-उत्तर-सूच्यः परीक्षा-परिणामाश्च

### प्रकटीकरिष्यन्ते - राष्ट्रीय-परीक्षण-अभिकरणम्

राष्ट्रीय-परीक्षण-अभिकरणेन ज्ञापितं यत् अस्मिन् एव सप्ताहे यू.जी.सी.-नेट्, सी.एस.आई.आर.-नेट् तथा आई.सी.ए.आर. परीक्षाणां अन्तिम-उत्तर-सूच्यः परीक्षा-परिणामाश्च प्रकटीकरिष्यन्ते। एषा सामग्री एन.टी.ए. संस्थायाः आधिकारिक-अन्तर्जाल-पटले स्थापयिष्यते। परीक्षार्थिभ्यः केवलं संस्थया प्रामाणिक-सूचनासु एव विश्वासं विधातुम् उपदेशः दत्तः।

## देशस्य प्रगतये महिलानां सक्तीकरणम् अतीव आवश्यकं वर्तते - रेखा गुप्ता।

देहल्याः मुख्यमन्त्रिणी रेखा गुप्ता अवदत् यत् देशस्य प्रगतये महिलानां सक्तीकरणम् अतीव आवश्यकं वर्तते। नवदेहल्यां दिल्ली-लक्ष्मी योजनायाः स्वीकृतिपत्राणि वितरन्ती श्रीमती गुप्ता संसूचितवती यत् योजनायाः प्रारम्भात् सम्प्रति द्वाविंशतिसहस्राधिक नव लक्ष महिलाभिः अस्मिन् पञ्जीकरणं विहितम्। तया उक्तं यत् अद्य सार्धद्विसहस्र लाभार्थिभ्यः स्वीकृति-प्रमाणपत्राणि च हस्तान्तरितानि।
मुख्यमन्त्रिणा प्रतिपादितं यत् औपचारिकताः पूरयित्वा एताः लाभार्थि-महिलाः अग्रिम-मासस्य प्रथमे दिनाङ्के सार्धद्विसहस्र रूप्यकाणां वित्तीय सहाय्यं प्राप्स्यन्ति। एषा सहायता महिलानां बालकानां शिक्षणे, गृह-पालने, लघु-व्यापारे च स्वावलम्बनं प्रदास्यति। अत्रावधेयं यत् अस्याः योजनायाः मुख्यम् उद्देश्यं महिलानां सशक्तीकरणं स्वावलम्बनञ्च अस्ति।

## राहुल-गान्धिनः कृते च महिला-सशक्तीकरणं केवलं निर्वाचन-घोषः एव वर्तते - भारतीय-जनता-दलम्

भारतीय-जनता-पार्टीति दलेन आरोपितं यत् कांग्रेस-दलाय तस्य वरिष्ठ-नेतुः राहुल-गान्धिनः कृते च महिला-सशक्तीकरणं केवलं निर्वाचन-घोषः एव वर्तते । नवदिल्ल्याम् एकं वार्ताहर-सम्मेलनं सम्बोधयन्ती बांसुरी स्वराजः अवदत् यत् केन्द्र-सर्वकारेण महिलानां सशक्तिकरणस्य उद्देश्येन लोकसभायां नारी शक्ति-वन्दनाधिनियमः समुपस्थापितः । सा आरोपितवती यत् कांग्रेस-दलेन अस्य विधेयकस्य विरोधः कृतः, सदने च अस्य अनुमोदन-मार्गे विघ्नः उत्पादितः। सा हिमाचल-प्रदेश-कर्नाटकयोः मन्त्रिमण्डलेषु महिला-मन्त्रिणां अनुपस्थितिं विषयीकृत्य राहुल-गान्धिनः प्रश्नान् कृतवती।

## कोलम्बो-स्पर्धायाम् श्रीलङ्का-दलस्य दृढः प्रत्याघातः 'फॉलो-ऑन' प्राप्य अपि चतुर्थ-दिवसान्ते भारतस्य उपरि षोडश धावनाङ्कानाम् अग्रता

कोलम्बो-नगरे द्वितीयान्तिम-निकष-द्वन्द्वे भारतं विरुध् फॉलो-ऑन' इत्यस्यानन्तरं चतुर्थ-दिनस्य क्रीडा-विराम-पर्यन्तं श्रीलङ्का-दलेन द्वितीय-पर्याये षट्-क्रीडकानां हानौ एकोनत्रिंशदधिक-द्विशतं धावनाङ्काः सम्पादिताः।

# आगामि-शैक्षणिकसत्रात् प्रवेशपत्रे न भविष्यति जातेः कोष्ठकः, मुख्यमन्त्रिणा सुक्खू-महोदयेन दत्ताः निर्देशाः

**हिमसंस्कृतवार्ताः- शिमला।**
मुख्यमन्त्री सुखविन्दरसिंहसुक्खूमहोदयः आगामि-शैक्षणिकसत्रात् विद्यालयप्रवेशपत्रे जातेः कोष्ठकं समापयितुं निर्देशान् दत्तवान्। शिमलायां हिमाचलप्रदेश- अनुसूचितजाति- कल्याण-मण्डलस्य उपवेशनस्य अध्यक्षतां कुर्वन् मुख्यमन्त्री अवदत् यत् राज्यसर्वकारः समाजे जातेः नाम्ना भेदभावं समापयितुं प्रयासं कुर्वन् अस्ति, समाजे च परस्परं भ्रातृभावः भवेत्। तेन प्रोक्तं यत् विद्यालय-प्रवेशपत्रे जातेः कोष्ठकस्य समापनम् अस्यां दिशि एकः प्रारम्भः भविष्यति, येन बालकाः कस्यापि हीन-भावनया ग्रस्ताः न भवेयुः। सः स्पष्टीकृतवान् यत् सर्वकारीययोजनानां लाभग्रहणाय अनुसूचित- जाति-समुदायस्य जनाः स्वजातेः कोष्ठकं पूरयितुं शक्ष्यन्ति, येन तेभ्यः एतासां योजनानां लाभः निरन्तरं प्राप्येत।
मुख्यमन्त्री सुक्खूमहोदयः अवदत् यत् राज्यसर्वकारः अनुसूचित- जाति- समुदायस्य समस्यानां समाधानाय प्राथमिकतां यच्छति। वर्त्तमानसर्वकारेण अस्य समुदायस्य कल्याणं सुनिश्चितं कर्तुम् अनेकाः योजनाः प्रारब्धाः, सर्वेषां योग्यव्यक्तीनां च अस्य विषये जागरूकता भवेत् येन ते एतासां कल्याणकारिणीनां योजनानां लाभं स्वीकर्तुं शक्नुयुः। तेन प्रोक्तं यत् राज्य-सर्वकारेण 'राजीवगान्धी- स्टार्ट-अप-स्वरोजगार- सौर- योजनायाः' अन्तर्गतं १०० किलोवाट-तः २ मेगावाटपर्यन्तं परियोजनास्थापनाय जनजातीयक्षेत्रेषु ५ प्रतिशतं तथा च अन्य-क्षेत्रेषु ४ प्रतिशतम् अनुदानं दीयते।
सः न्यवेदयत् यत् राज्यसर्वकारः मेधाविछात्रेभ्यः उच्चशिक्षायै एकप्रतिशत- व्याजदरेण २० लक्ष-रूप्यकाणाम् ऋणम् अपि उपलभ्यते, येन ते धनस्य अभावात् स्वशिक्षणं त्यक्तुं विवशाः न भवेयुः। मुख्यमन्त्रिणा विज्ञापितं यत् राज्यसर्वकारः अति-निर्धन- परिवारेभ्यः 'स्वपरिवारः सुखीपरिवारः' इति योजनां प्रवर्त्तयितुं गच्छति। अस्य अन्तर्गतं तेभ्यः परिवारेभ्यः ३०० यूनिटपर्यन्तं निःशुल्कविद्युत् तथा च एतेषां परिवाराणां महिलाभ्यः प्रतिमासं १५०० रूप्यकाणि निवृत्ति-वेतनं प्रदास्यते।




## ८.४१ लक्ष-जनेभ्यः दीयते सामाजिक-सुरक्षा- निवृत्तिवेतनम्

अस्मिन् अवसरे सामाजिक- न्याय- एवं-सशक्तीकरणमन्त्री डॉ. (कर्नल) धनीरामशाण्डिलः अवदत् यत् राज्य-सर्वकारेण ८,४१,९१७ जनेभ्यः सामाजिक- सुरक्षा- निवृत्तिवेतनं प्रदीयते। वृद्धपुरुषेभ्यः १००० रूप्यकाणि, महिलाभ्यः, दिव्यांगजनेभ्यः, विधवाभ्यः, परित्यक्ताभ्यः/ एकल-महिलाभ्यः १५०० रूप्यकाणि, ७० वर्षाधिकाभ्यः वृद्धेभ्यः ७० प्रतिशत-तः अधिक- दिव्यांगता-युक्तेभ्यः नागरिकेभ्यः प्रतिमासं १७०० रूप्यकाणां दरेण सामाजिक-सुरक्षा-निवृत्ति-वेतनं प्रदीयमानम् अस्ति। तेन प्रोक्तं यत् वर्त्तमान- वित्तवर्षे निवृत्ति-वेतन-योजनायां प्रायः १४०० कोटि- रूप्यकाणि व्ययीक्रियन्ते।
तेन उक्तं यत् सामाजिक- न्याय- एवं- सशक्तीकरण-विभागेन अनुसूचित-जाति, अनुसूचित- जनजाति, अन्यपृष्ठवर्ग, महिलानां, बालकानां वृद्धानां च सामाजिक- आर्थिक- उत्थानाय सञ्चालितासु विविधासु योजनासु अस्मिन् वित्त-वर्षे प्रायः ३१४.९० कोटि-रूप्यकाणि तथा च अनुसूचित- जाति- विकास-कार्यक्रमे ११०५.३७ कोटि- रूप्यकाणि व्ययीक्रियन्ते।
उपवेशने मुख्यसचिवः के. के. पन्तः, विविधविभागानां प्रशासकीयसचिवाः, सामाजिक- न्याय- एवं-सशक्तीकरणसचिवः सी. पी. वर्मा, निदेशकः सुमितखिमटा, हिमाचलप्रदेश- अनुसूचितजाति-कल्याण- मण्डलस्य अशासकीय- शासकीय-सदस्याः वरिष्ठ- अधिकारिणश्च उपस्थिताः आसन्।

# 'हिमकेयर', 'आयुष्मान्', 'सहारा' योजनाः न स्थगयिष्यन्ते; विधास्यते परिष्कारः

हिमसंस्कृतवार्ताः- शिमला। हिमाचलप्रदेशे स्वास्थ्यसेवाः आधुनिकीकर्तुं चिकित्सालयेषु वैद्यानां, परिचारिकाणां, सहायक- चिकित्सा- कर्मचारिणां च न्यूनतां दूरीकर्तुं प्रयासाः क्रियन्ते। स्वास्थ्य-परिवार-कल्याण-मन्त्री कर्नल- धनीरामशाण्डिलः अवदत् यत् 'हिमकेयर', 'आयुष्मान्', 'सहारा' इति योजनाः न स्थगयिष्यन्ते, अपि तु एतासु विद्यमानानां त्रुटीनां परिष्कारं कृत्वा एताः अधिकाः उत्तमाः विधास्यन्ते। सर्वकारस्य लक्ष्यं वर्तते यत् जनेभ्यः गृहद्वारमेव आधुनिक- चिकित्सा- सुविधाः प्रापणीयाः। मन्त्री एतां वार्तां भारतीय-जनता-पक्षस्य (भाजपा) वरिष्ठ-विधायकस्य विपिनसिंहपरमारस्य अन्येषां च पक्षतः विधानसभायां नियम-१३० इत्यस्य अन्तर्गतं स्वास्थ्यसेवा-विषये आनीते प्रस्तावे चर्चायाश्च प्रत्युत्तरं यच्छन् प्रोक्तवान्। शाण्डिलमहोदयः न्यवेदयत् यत् चिकित्सा- शिक्षाविभागे आचार्याणां, निवासिवैद्यानां, परिचारिकाणां, सहायक- चिकित्साकर्मचारिणां च आहत्य ६,३६५ स्वीकृतेषु पदेषु ४,६६१ पदानि पूरितानि सन्ति। स्वास्थ्य- परिवार- कल्याणविभागे परिचारिकाणां १,९३८ पदेषु १,२६६ कर्मचारिणः कार्यरताः सन्ति, यदा तु २०० पदानां पूरणप्रक्रिया प्रचलति। ११७ सहायक- परिचारिकाभ्यः नियुक्तिपत्राणि वितरितानि। राष्ट्रिय-स्वास्थ्य-अभियानस्य अन्तर्गतं स्वीकृतेषु ६,०८८ पदेषु ४,११५ कर्मचारिणः कार्यरताः सन्ति, अवशिष्टेषु बाह्य-स्रोतपदेषु नियुक्ति-प्रक्रिया प्रचलन्ती वर्तते।

**स्वास्थ्य-संरचनायाः आधुनिकीकरणम्**

स्वास्थ्यमन्त्रिणा प्रोक्तं यत् इन्दिरागान्धी- आयुर्विज्ञान-महाविद्यालये नूतनानां व्याख्यानकक्षाणां परीक्षाभवनानां च निर्माणं तीव्रतया प्रचलति। नाभीकी-चिकित्सार्थम् अर्बुद- रोग- चिकित्सार्थं च पृथक् खण्डः सज्जीक्रियते। चमियानास्थिते अटल- आयुर्विज्ञान-विशिष्ट- संस्थाने आधुनिकोपकरणानि उपलब्धानि कारितानि सन्ति। आयुर्विज्ञान-महाविद्यालयेभ्यः 'रोबोटिक' शल्यक्रिया-उपकरणानि क्रीतवन्तः। नेरचौक, हमीरपुरं, टाण्डा-क्षेत्रेषु च 'कैथ-लैब' (हृद्रोग-परीक्षण-शालाः) स्थाप्यन्ते। प्रदेशस्य २५ स्थानेषु १२८ यन्त्रैः सह वृक्क-शोधन-घटकाः सञ्चाल्यन्ते।

# सीबीएसई-विद्यालयेषु ३० सितम्बर-पर्यन्तं पूरयिष्यन्ते शिक्षकाणां सर्वाणि पदानि, ८० कोटि-रूप्यकैः निर्मीयन्ते सङ्गणक-प्रयोगशालाः




**हिमसंस्कृतवार्ताः- शिमला।**
मुख्यमन्त्री सुखविन्दरसिंहसुक्खू-महोदयः बुधवासरे विधानसभायाः वर्षर्तुसत्रे प्रश्नोत्तरकाले अवदत् यत् प्रदेशस्य १४७ सीबीएसई-विद्यालयेषु ३० सितम्बरपर्यन्तं सर्वेषां शिक्षकाणां नियुक्तिः सम्पूर्णा भविष्यति। राज्यसर्वकारेण एतेषु विद्यालयेषु सङ्गणक-प्रयोगशालानां संस्थापनाय ८० कोटि- रूप्यकाणां प्रावधानं कृतम् अस्ति। आगामिसमये अन्यान् १०० सर्वकारीयविद्यालयान् अपि सीबीएसई- प्रणाल्या सह संयोजयितुं सज्जीकरणं प्रचलति।

मुख्यमन्त्रिणा प्रोक्तं यत् सीबीएसई-विद्यालयेषु शिक्षकाणां नियुक्तये योग्यतायाः स्पष्टाः मानदण्डाः निर्धारिताः। चयनप्रक्रियायां योग्यताक्रमः ८० प्रतिशतपर्यन्तः जातः। परिणामप्रकाशनस्य अनन्तरं शिक्षकाणां पदस्थापन-प्रक्रिया प्रारब्धा। सर्वकारस्य मुख्यः आग्रहः एतादृशानां शिक्षकाणां नियुक्तौ वर्तते, ये छात्रेभ्यः राष्ट्रिय- स्तरीय- पाठ्यक्रमानुसारम् उत्तमां शिक्षां दातुं समर्थाः भवेयुः।

## केन्द्रसर्वकारात् न प्राप्ता कापि वित्तीय- सहायता- मुख्यमन्त्री

मुख्यमन्त्री सदने स्पष्टीकृतवान् यत् प्रदेशे सीबीएसई-व्यवस्थां प्रवर्तयितुं केन्द्र-सर्वकारात् काऽपि वित्तीयसहायता न प्राप्ता। एतेषां विद्यालयानां वित्तीयभारं हिमाचलसर्वकारः स्वयं वहति। मुख्यमन्त्रिणा प्रोक्तं यत् सर्वकारीय- विद्यालयेषु छात्राणां सङ्ख्यायाः निरन्तरह्रासः सर्वकाराय चिन्तायाः विषयः अस्ति। मुख्यमन्त्रिणः अनुसारं सीबीएसई-व्यवस्थायाः प्रवर्त्तनानन्तरं सर्वकारीय-विद्यालयेषु प्रायः २४ सहस्र-छात्राणां सङ्ख्या वर्धिता। अपरपक्षे शिक्षामन्त्री रोहितठाकुरः अवदत् यत् १४७ सीबीएसई-विद्यालयानां कृते षट्- सहस्राधिकानि (६,०००+) शिक्षक-पदानि स्वीकृतानि सन्ति। प्रथमे चरणे शिक्षकाणां नियुक्तिः योजना- आधारित-व्यवस्थायाः अन्तर्गतं भविष्यति। तेभ्यः ३० सहस्र-रूप्यकाणि मासिकमानदेयं प्रदास्यते। साम्प्रतं वर्ष-द्वयानन्तरम् एतेषां शिक्षकाणां नियमितीकरणस्य कोऽपि निर्णयः न स्वीकृतः। तथापि मुख्यमन्त्री शिक्षामन्त्री च स्पष्टीकृतवन्तौ यत् शिक्षकाणां भविष्यं नियमितीकरणस्य विषयं चाधिकृत्य सर्वकारः अग्रे सकारात्मकं गम्भीरं च विचारं विधास्यति। मन्त्रिणा विज्ञापितं यत् एतेषु विद्यालयेषु ३,८३० शिक्षकाः उपलब्धाः सन्ति, यदा तु २,१८३ पदानि रिक्तानि वर्तन्ते। रिक्तानि पदानि अपि चयन-आयोगस्य माध्यमेन प्रायः एकस्मिन् मासे पूरयिष्यन्ते। सङ्गणकशिक्षकाः अपि सीबीएसई-विद्यालयेषु समायोजिताः भविष्यन्ति।

## दशमासानां वेतने भाजपा-पक्षेण वेष्टितः सर्वकारः

तत्रैव प्रश्नोत्तरकाले भारतीय-जनता-पक्षस्य (भाजपा) विधायकः सुधीरशर्मा सीबीएसई- शिक्षकेभ्यः १० मासानां वेतन-प्रदानस्य प्रावधाने प्रश्नान् उत्थापितवान्। सः सर्वकारं प्रति अपृच्छत् यत् किं एतेभ्यः शिक्षकेभ्यः अपि १२ मासानां वेतनं प्रदास्यते। सः शिक्षकाणां नियुक्तेः भविष्ये च नियमितीकरणस्य स्थितिं स्पष्टीकर्तुं न्यवेदयत्।

विधायकः रणधीरशर्मा १४७ विद्यालयानां सीबीएसई-प्रणाल्याम् आनयनस्य आधारं शिक्षकाणां न्यूनतायाश्च विषयम् उत्थापितवान्। सः अवदत् यत् केषुचित् शिक्षाखण्डेषु अद्यापि एकोऽपि सीबीएसई-विद्यालयः नास्ति। विधायकः डॉ. जनकराजः स्वक्षेत्रे सीबीएसई-विद्यालयस्योद्घाटनार्थं याचनां कुर्वन् अवदत् यत् सीबीएसई- आधारेण प्रचलत्सु विद्यालयेषु सर्वे आवश्यकाः मानदण्डाः पूर्णाः भवेयुः।

विधायकः विपिनपरमारः सीबीएसई-विद्यालयानां सङ्ख्या-वृद्ध्या हिमाचलप्रदेश- विद्यालय- शिक्षा-मण्डले जायमानस्य आर्थिकप्रभावस्य विषयम् उत्थापितवान्।

## ८.४१ लक्ष-जनेभ्यः दीयते सामाजिक- सुरक्षा-निवृत्तिवेतनम् । क्रमशः...

एकादश (११) नूतनानि विशिष्ट- नवजात-शिशुसंरक्षण-केन्द्राणि, सप्तदश (१७) नवजात-शिशु- स्थिरीकरण- घटकानि अपि स्वीकृतानि। हमीरपुरे २६४ शय्या-युक्ताय राज्य- कर्कट- रोग-संस्थानाय धनादेशाः प्रसारिताः। मन्त्रिणा स्पष्टीकृतं यत् सर्वकारः केवलं भवनानां यन्त्राणां च स्थापनायां सीमितः नास्ति, अपि तु विशेषज्ञवैद्यानां स्वास्थ्य-कर्मचारिणां च पर्याप्तां सम्प्राप्तिं सुनिश्चितं कर्तुम् अपि कार्यं करोति।

# आउटसोर्स-कर्मचारिणां कृते स्वीकरिष्यते नीतिगतनिर्णयः, अधुना चयन- आयोगस्य माध्यमेनैव भविष्यति परिचारिकाणां नियुक्तिः- मुख्यमंत्री



हिमसंस्कृतवार्ताः- शिमला।हिमाचलप्रदेशस्य विधानसभायां मुख्यमन्त्री सुखविन्दरसिंहसुक्खू-महोदयः प्रोक्तवान् यत् राज्यसर्वकारः आउटसोर्स-कर्मचारिणः अधिकृत्य एकं नीतिगतनिर्णयं ग्रहीतुं गच्छति, यस्योपरि सम्प्रति विचारः प्रचलति। हिमाचले अधुना परिचारिकाणां नियुक्तिः आउटसोर्स-आधारेण न भविष्यति। तासां नियुक्तिः राज्य-चयन-आयोगस्य माध्यमेनैव भविष्यति, यथैव साम्प्रतं ६०० तः अधिकानां साहायक-परिचारिकाणां नियुक्तिः कृता। राज्यसर्वकारः इच्छति यत् स्वास्थ्यक्षेत्रे गुणवत्ता स्थायिनी भवेत्। विधानसभायां प्रश्न-काले मुख्यमन्त्रिणा एषा सूचना प्रदत्ता। भाजपा-विधायकस्य दीपराजस्य प्रश्नस्य उत्तरे मुख्यमन्त्री अवदत् यत् राज्य-सर्वकारः केवलं सेवाः आउटसोर्स करोति, न तु व्यक्तिम्। व्यक्तिः तस्याः एजन्सी-संस्थायाः अनुबन्धकस्य वा उत्तरदायी भवति। सः कर्मचारिणं अपनीतुं परिवर्तयितुं च शक्नोति। भाजपा-विधायकस्य रणधीरशर्मणः अनुपूरकप्रश्नस्य उत्तरं यच्छन् मुख्यमन्त्री अवदत् यत् सम्प्रति सेवाः त्रिधा आउटसोर्स क्रियन्ते। एका एजन्सी राज्य-सर्वकारस्य 'स्टेट- इलेक्ट्रॉनिक्स- डेवलपमेंट- कॉरपोरेशन' इति अस्ति, अपरा च भारतसर्वकारस्य 'नाइलेट' अस्ति। एतदतिरिच्य निजी-एजन्सीनां माध्यमेन अपि कर्मचारिणः गृह्यन्ते। एतेषां सूचीबद्धीकरणं बिडिंग-माध्यमेन इलेक्ट्रानिक्स- डेवलपमेंट- कॉरपोरेशन इति करोति। एताः संस्थाः साक्षात्कारस्य लिखित-परीक्षायाः वा आधारेण चयनं कर्तुं शक्नुवन्ति। राज्यसर्वकारपक्षतः निर्धारितं मानदेयं वेतनं वा एताः संस्थाः कर्मचारिभ्यः यच्छन्ति। यदि कस्यापि संस्थायाः विरुद्धं काचित् उपालम्भः अस्ति, तर्हि विधायकाः सर्वकाराय वदन्तु। सर्वकारः तस्योपरि कार्यानुष्ठानं विधास्यति। मुख्यमन्त्रिणा प्रोक्तं यत् एतादृशाः विषयाः अपि तस्य ध्याने आगताः सन्ति यत् ४० कर्मचारिणां नियुक्तिस्थाने केवलं ३० एव स्थाप्यन्ते। एवं तु इदानीं न प्रवर्तिष्यते। भाजपाविधायकः राकेश जमवालः सुन्दरनगर- चिकित्सालयस्य 'ऑक्सीजन' संयंत्रस्य पिधानस्य विषयम् उत्थापितवान्, यतः पूर्वतन-सर्वकारस्य काले नियुक्तौ द्वौ आउटसोर्स-कर्मचारिणौ अपनीतौ आस्ताम्। मुख्यमन्त्री प्रत्युत्तराय अवदत् यत् कोविडकाले नियुक्ताः बहवः कर्मचारिणः पुनः नियुक्ताः सन्ति। यदि कोऽपि अवशिष्टः अस्ति, तर्हि तस्य सूचना सर्वकाराय दीयताम्। यावत् 'ऑक्सीजन' संयंत्रस्य विषयः अस्ति, चयनप्रक्रियातः कर्मचारिणां आगमनात् प्राक् आउटसोर्स- माध्यमेन जनान् आनीय एतद् संयंत्रं सञ्चालयिष्यते। चुराह-क्षेत्रस्य भाजपाविधायकः डॉ. हंसराजः अवदत् यत् आउटसोर्सनीतिः संविधानस्य विरुद्धा अस्ति, यतः सा समतायाः अधिकारं भङ्गयति। किं सर्वकारः अत्र आरक्षण- रोस्टर- प्रबन्धनस्य विचारं करोति?



अस्य प्रत्युत्तरे मुख्यमन्त्री अवदत् यत् वयं केवलं सेवाः आउटसोर्स कुर्मः, तत्र च आरक्षणस्य सम्भावना नास्ति।

## काङ्ग्रेस-पदाधिकारिणः निर्मिताः निविदाकारः- - जयरामठाकुरः

विपक्षनेता जयरामठाकुरः आरोपम् अकरोत् यत् वर्तमान-राज्य-सर्वकारेण काङ्ग्रेस-दलस्य पदाधिकारिणः निर्वाचनप्रत्याशिनश्च आउटसोर्स-कार्यस्य निविदाकारः निर्मिताः, यदा तु उच्चन्यायालयेन 'इम्पैनलमेण्ट' इत्यस्योपरि गम्भीराः प्रश्नाः उत्थापिताः सन्ति। अस्य प्रत्युत्तरे मुख्यमन्त्री अवदत् यत् सूचीबद्धीकरणम् एका प्रक्रिया अस्ति, या पूर्वतन-सर्वकारस्य काले प्रचलिता आसीत्। यत्र उच्चन्यायालयस्य प्रश्नः अस्ति, तर्हि यः विषयः न्यायालये प्रचलति, तस्मिन् विषये सदने चर्चा करणम् उचितं नास्ति। तथापि अस्मिन् विषये स्थगनं नास्ति। नियमाः अपि पूर्व- सर्वकारस्य काले एव निर्मिताः सन्ति। मुख्यमन्त्री अवदत् यत् जयरामठाकुरः स्व-निर्वाचन-क्षेत्रस्य एकस्य व्यक्तिः विषये वदति। सः तस्मै अपि निर्देशं दास्यति यत् तस्य अपि केचन जनाः नियुक्ताः भवेयुः

# श्रीसीताराम- वैदिकादर्श- संस्कृतमहाविद्यालये संस्कृतसप्ताहसमारोहस्य भव्यः शुभारम्भः

हिमसंस्कृतवार्ताः- डॉ. निशिकान्तपाण्डेयः



कोलकातायां संस्कृतसप्ताहसमारोहस्य भव्यः शुभारम्भः कोलकातास्थिते श्रीसीताराम- वैदिकादर्श- संस्कृत- महाविद्यालये २५ अगस्त् २०२६ दिनाङ्के संस्कृतसप्ताहसमारोहस्य प्रथमदिवसः श्रद्धया, उत्साहेन च विविधैः कार्यक्रमैः सह सम्पन्नः। अयं संस्कृतसप्ताहसमारोहः २५ अगस्ततः ३१ अगस्त् २०२६ पर्यन्तम् आयोजितः अस्ति।

प्रथमदिने प्रातः रुद्राभिषेकः, हवनकार्यक्रमः च आयोजितः। रुद्राभिषेककार्यक्रमे यजमानत्वेन महाविद्यालयस्य प्राचार्यः डॉ. सोमेशकुमारमिश्रः उपस्थितः आसीत्। हवनकार्यक्रमे अरणिजन्याग्निना वैदिकविधिना हवनं सम्पन्नम्। महाविद्यालयस्य सर्वे छात्राः आचार्याश्च श्रद्धापूर्वकं कार्यक्रमेषु उपस्थिताः आसन्। मध्याह्ने संस्कृतभाषायाः प्रचारप्रसाराय भव्यायाः संस्कृत- शोभायात्रायाः आयोजनं कृतम्। महाविद्यालयतः महामिलनमठपर्यन्तमियं शोभायात्रा प्रवृत्ता। छात्रैः, आचार्यैः, अन्यैः सहभागिभिश्च उत्साहपूर्वकं शोभायात्रायां सहभागिता कृता। तदुत्तरं महामिलनमठे सर्वेभ्यः प्रसादः अपि प्रदत्तः। अपराह्णे त्रिवादने छात्रैः विविधाः सांस्कृतिकाः कार्यक्रमाः प्रस्तुताः। संस्कृतगीतैः, श्लोकपाठेन, नाट्यप्रस्तुतिभिः तथा अन्याभिः सांस्कृतिकाभिः प्रस्तुतिभिः कार्यक्रमः आकर्षकः अभवत्। सायं चतुर्वादने महाविद्यालयस्य मुख्यसभागारे उद्घाटनसत्रम् आयोजितम्। सत्रस्य संरक्षकः केन्द्रीयसंस्कृतविश्वविद्यालयस्य कुलपतिः प्रो. श्रीनिवासवरखेडीवर्यः आसीत्। मुख्यातिथिरूपेण वेदविज्ञानशोधसंस्थानस्य, बेङ्गलूरु इत्यस्य अध्यक्षः प्रो. रामचन्द्र जि. भट्टवर्यः उपस्थितः आसीत्। कार्यक्रमस्य अध्यक्षतां महाविद्यालयस्य अध्यक्षः प्रो. एस. सुब्रह्मण्यशर्मावर्यः अकरोत्। महाविद्यालयस्य प्राचार्यः डॉ. सोमेशकुमारमिश्रः विशिष्टभूमिकां निर्वहन् उपस्थितः आसीत्। कार्यक्रमसमन्वयकः डॉ. सुब्रह्मण्यभट्टः अपि उपस्थितः आसीत्। सर्वे आचार्याः छात्राः अभिभावकाश्च कार्यक्रमेऽस्मि उपस्थाय शोभां वर्धितवन्तः। प्रो. रामचन्द्र जी. भट्टवर्यैः संस्कृतसम्भाषणशिबिरस्य, श्रीमद्भगवद्गीताध्ययनप्रकल्पस्य च उद्घाटनं कृतम्। कार्यक्रमे संस्कृतभाषायाः प्रचारप्रसारस्य, छात्रेषु संस्कृताध्ययनस्य रुचेः संवर्धनस्य, भारतीय- ज्ञान- परम्परायाः संरक्षणस्य महत्त्वं प्रतिपादितम्।

प्रथमदिवसस्य कार्यक्रमाः छात्राणाम्, आचार्याणां, सहभागिनां च सक्रियसहयोगेन सफलतया सम्पन्नाः।

# सी एस यू रणवीर-परिसरे भव्य- संस्कृत- शोभा- यात्रायाः समायोजनम्



हिमसंस्कृतवार्ताः- प्रवेशकुमारशुक्लः जम्मू

केन्द्रीय- संस्कृत- विश्वविद्यालयस्य श्रीमहाराज- रणवीरपरिसरे, कोटभलवाल, जम्मू इत्यत्र २५ अगस्त २०२६ दिनाङ्के पूर्वाह्ने १०:०० वादने परिसरात् सर्वेषां छात्राणां सहभागितया भव्यसंस्कृतशोभायात्रा आयोजिता। सामान्यजनानां मध्ये संस्कृतभाषायाः सम्यक् प्रचारः प्रसारश्च भवेदिति शोभायात्रायाः प्रमुखमुद्देश्यम् आसीत्। अस्याः संस्कृतशोभायात्रायाः परिसरनिदेशकः प्रो. सतीशकुमारकपूरः कृतवान्। शोभायात्रायां परिसरस्य समस्ताः छात्राः उत्साहपूर्वकं सहभागितां कृतवन्तः। कार्यक्रमस्य संयोजकः डॉ. प्रमोदकुमारशुक्लः, सहसंयोजकौ डॉ. रतनकुमारपाण्डेयः, डॉ. गोपालवर्मा च विशेषरूपेण उपस्थिताः आसन्। तदनन्तरं डॉ. मदनकुमारझा, डॉ. प्रवीणमणित्रिपाठी, डॉ. अन्यत्रमणित्रिपाठी, डॉ. सत्यव्रतपाण्डेयः, कुन्दनझावर्यः, गुरमीतसिंहवर्यः, डॉ. प्रदीपमिश्रः च सहिताः परिसरस्य अन्ये सर्वे प्राध्यापकाः, कार्यालयस्य समस्ताः कर्मचारिणः चापि शोभायात्रायां सहभागितां कृतवन्तः।

संस्कृतशोभायात्रया परिसरस्य वातावरणं संस्कृतमयमभवत्। छात्रैः संस्कृतभाषायाः महत्त्वं, प्राचीनभारतीयसंस्कृतेः गौरवं, संस्कृतस्य च जनसामान्येषु प्रचारप्रसारस्य आवश्यकता च विविधैः घोषवाक्यैः प्रदर्शिता। शोभायात्रा संस्कृतभाषायाः प्रति जनमानसे जागरूकतां जनयन्ती उत्साहपूर्णवातावरणे सम्पन्ना।

# अखिलभारतीय- शिक्षा- समागम- २०२६ इत्यन्तर्गतं ज्ञानवर्धक- रचनात्मक- कार्यक्रमाणाम् आयोजनम् अभवत्



## चन्द्रबदनी-परिसरे कवितारचना, प्रश्नोत्तरी- प्रतियोगिताः आयोजिताः।

हिमसंस्कृतवार्ताः- चन्द्रबदनी, टिहरी।

श्रीदेवसुमन- उत्तराखण्ड- विश्वविद्यालयस्य चन्द्रबदनीपरिसरे परिसरनिदेशकस्य डाॅ. महन्थमौर्यस्य अध्यक्षतायां शिक्षामन्त्रालयस्य भारतसर्वकारस्य तत्त्वावधाने आयोजितस्य अखिलभारतीय- शिक्षा- समागम- २०२६ इत्यन्तर्गतं ज्ञानवर्धक- रचनात्मक- कार्यक्रमाणाम् आयोजनम् अभवत्। अस्मिन् कार्यक्रमे कवितारचना, भारतीय- ज्ञानपरम्परा- विषये प्रश्नोत्तरी- प्रतियोगिते आयोजिते। विद्यार्थिनः महोत्साहेन प्रतियोगितासु सहभागित्वं कृतवन्तः। कविता- रचना- प्रतियोगितायां षट् विद्यार्थिन्यः सहभागिन्यः अभवन्। बी. ए. तृतीयसत्रस्य छात्रे खुशबू, सृष्टि च भावपूर्णं कवितापाठं प्रस्तुतवत्यौ। तयोः प्रभावशालिनी प्रस्तुतिः भारतीयसंस्कृतेः, परम्परायाः तथा मानवीयमूल्यानां गौरवं सम्यक् प्रकाशितवती। कार्यक्रमस्य संचालनं हिन्दी- विभागस्य प्राध्यापिका डा. सरिता कवितापाठेन सह कृतवती। अध्यक्षीयसम्बोधने डाॅ. महन्थमौर्यः भारतीय- ज्ञान- परम्परायाः समृद्धविरासतां ज्ञातुं, तां नवपीढ्यै प्रेषयितुम् आवश्यकताम् अवोचत्। द्विदिवसीयकार्यक्रमस्य नोडल-अधिकारी डा मूलचन्द्रशुक्लः कार्यक्रमस्य उद्देश्यान् विवृण्वन् विद्यार्थिनः भारतीय- ज्ञानपरम्परां ज्ञातुम्, अवगन्तुं च आत्मसात्कर्तुं प्रेरितवान्। कार्यक्रमस्य अन्ते एण्टी- ड्रग- सेल इत्यस्य नोडल- अधिकारी डा. सुरेशकुमारभट्टः सर्वान् मद्यादिव्यसनमुक्तेः शपथं कारितवान्।

समापनसत्रे डा. गुरुप्रसाद थपलियालः धन्यवादज्ञापनं कृत्वा सर्वेषां प्राध्यापकाणां, कर्मचारिणां, विद्यार्थिनां सहयोगाय हार्दिकम् आभारम् अव्यक्तयत्।

अस्य कार्यक्रमस्य प्रमुखोद्देश्यः विद्यार्थिषु भारतीय- ज्ञान- परम्परां प्रति रुचि- गौरव- भावनायाः विकासः, रचनात्मक-प्रतिभायाः प्रोत्साहनं, व्यसनमुक्त- समाजनिर्माणस्य जागरूकतायाः संवर्धनम् आसीत्।

# राजकीय-उत्कृष्ट-वरिष्ठ-माध्यमिक-पाठशाला-कोटी-धीमान्-विद्यालये संस्कृत-सप्ताहोपलक्ष्ये रङ्गावली-प्रतियोगिता आयोजिता



कोटी धीमान्। राजकीय-उत्कृष्ट-वरिष्ठ-माध्यमिक-पाठशाला-कोटी-धीमान्-विद्यालये 'संस्कृत-सप्ताहस्य' पावनोपलक्ष्ये छात्राणां कृते एकायाः भव्य-रङ्गावली-प्रतियोगितायाः (Rangoli Competition) आयोजनं कृतम्। अस्मिन् कार्यक्रमे विद्यालयस्य छात्र-छात्राभिः अतीवोत्साहेन सहभागित्वं निर्व्यूढम्। प्रतिभा-प्रदर्शनम्: प्रतियोगितायां विभिन्न-सदनानां विद्यार्थिभिः संस्कृतभाषायाः, भारतीय-संस्कृतेः तथा च वैदिक-प्रतीकानां चित्राङ्कनं कुर्वन्त्यः मनोहराः रङ्गावल्यः रचिताः। अस्यां प्रतियोगितायां गान्धी-सदनस्य (Gandhi House) विद्यार्थिनीभिः अत्यन्तं कलात्मिका, मनमोहिनी च रङ्गावली प्रस्तुता, यया सर्वेषां मनसि विशेषः प्रभावः स्थापितः।

# संस्कृतभारती अवधप्रान्तस्य प्रयासेन भारतीय- डाक- विभागस्य च संयुक्ततत्त्वावधाने विश्व-संस्कृत-सप्ताहस्य भव्यम् उद्घाटनम्




**हिमसंस्कृतवार्ताः- लखनऊ।**

संस्कृतभारती अवधप्रान्तस्य प्रयासेन भारतीय- डाक- विभागस्य च संयुक्ततत्त्वावधाने जी.पी.ओ. लखनऊ- नगरस्य फिलेटली-कक्षे विश्व- संस्कृत- सप्ताहस्य (२५ अगस्त - ३१ अगस्त २०२६) उद्घाटनसमारोहः गरिमामयरूपेण सम्पन्नः।अस्मिन् अवसरे मुख्य- अतिथिरूपेण उत्तरप्रदेश- परिमण्डलस्य मुख्य- डाक- महाध्यक्षः अजयसिंह चौहानमहोदयः रिमोट-यन्त्रस्य बटनं पीडयित्वा संस्कृतभारत्याः कृते निर्मितायाः विशेषमुद्रायाः अनावरणं कृतवान्। अस्मिन् अवसरे डाकमहाध्यक्षः सुनीलकुमाररायमहोदयः, संस्कृतभारती अवधप्रान्तन्यासाध्यक्षः जितेन्द्रप्रताप सिंहमहोदयः, पूर्व-उत्तरप्रदेशक्षेत्रस्य सङ्घटनमन्त्री प्रमोद पण्डित महोदयः, अवधप्रान्त-अध्यक्षः डॉ. चन्द्रभूषण त्रिपाठी-महोदयः, न्याससचिवः शोभनलाल उकील-महोदयः विशेषरूपेण उपस्थिताः आसन्।

मुख्य-डाक-महाध्यक्षः अजयसिंह चौहानमहोदयः अवदत् यत् संस्कृतभाषायाः उन्नयनाय प्रचारप्रसाराय च डाकविभागेन संस्कृतभारत्याः अनुरोधे इयं विशेष-मुद्रा स्वीकृता। सप्ताहपर्यन्तं सर्वेषु डाकपत्रेषु इयं मुद्रा स्थापयिष्यते। सङ्घटनमन्त्री प्रमोदपण्डितमहोदयः स्वभाषणे उक्तवान् यत् संस्कृत-भाषा अत्यन्तं सरला सुगमा च अस्ति। जन-जन-पर्यन्तं तस्याः प्रापणमेव अस्माकं लक्ष्यम्। कोऽपि जनः केवलं विंशति-घण्टाभिः संस्कृत-भाषां सम्यक् शिक्षितुं शक्नोति, तदर्थं संस्कृतभारत्या प्रतिदिनं एक-घण्टायाः निःशुल्ककक्षा संचाल्यते। डाक-महाध्यक्षः सुनीलकुमाररायमहोदयः संस्कृतं भारतीय-संस्कृतेः आत्मा इति उक्त्वा अवदत् यत् अस्माकं सर्वे प्राचीनग्रन्थाः संस्कृते एव सन्ति, इयं देववाणी अस्ति, प्राचीनतमा वाणी अस्ति।अन्ते संस्कृतभारती अवधप्रान्त-न्यासाध्यक्षः श्रीमान् जितेन्द्रप्रतापसिंहमहोदयः मुख्य- डाकमहाध्यक्षः, डाकमहाध्यक्षः, प्रमोदपण्डितमहोदयः, डॉ. त्रिपाठीमहोदयः, उकीलमहोदयः च सहितानां सर्वेषां गणमान्यव्यक्तीनाम्, उपस्थितानां फिलेटली-संग्राहकाणां च आभारं प्रकटितवान्।



# "१० वर्षाणि यूपीआई प्रारम्भात् सम्पन्नम्"

**हिमसंस्कृतवार्ताः- रविः खरिडेहालः - बेङ्गलूरु।**

यूपीआई इत्यस्य आरम्भः २५.०८.२०१६ दिनाङ्के अभवत्। भारतस्य धन-देयता-प्रदानस्य, धन-देयता- प्राप्तेः च मार्गस्य परिवर्तनं यूपीआइ इत्यनेन कृतम् अस्ति। विगतदशके यूपीआई देशस्य अङ्कीयव्यवहारपारिस्थितिकीतन्त्रस्य कोणशिलारूपेण विकसितः अस्ति। व्यवहाराः द्रुततराः सरलाः, सुलभाः च अभवन्। २०१६-१७ तमे वर्षे अङ्कीयव्यवहारसङ्ख्यामात्रा १.७८ कोटिः आसीत्। अधुना संख्या २४,१६२ कोटिः अस्ति। १३००० गुणा वृद्धिः अस्ति। यूपीआई अङ्कीयव्यवहारमूल्यं तस्मिन् समये ०.०७ लक्षकोटिरूप्यकात् २०२५-२६ तमे वर्षे ३१४ लक्षकोटिरूप्यकाणि यावत् वर्धितम् अस्ति। ४००० गुणा वृद्धिः। तदा अङ्कीयव्यवहाराः केवलं २१ वित्तकोषैः समर्थिताः आसन् अधुना यूपीआई आधारभूतसंरचना ७४१ वित्तकोषैः समर्थितः अस्ति। संख्यानुसारं सामान्यतदैनिकव्यवहारः २०२६ तमे वर्षे ६६ कोटिः अस्ति।

वृद्ध्या चालितः आगामिदशके अधिकाः उपयोक्तारः अधिकाः व्यापारिणः च यूपीआई-द्वारा सेवां प्राप्नुयुः।

# नैमिषारण्ये संस्कृतसप्ताहे निबन्धप्रतियोगिता, भाषाक्रीडा,श्लोकान्त्याक्षरी च सम्पन्ना

**हिमसंस्कृतवार्ताः- सत्येन्द्र पाठकः, सीतापुरम्।**

नैमिषक्षेत्रस्थिते आत्मानन्दसंस्कृतशिक्षणसंस्थाने संस्कृतभारती, सीतापुरस्य तत्त्वावधानेन प्रचलितस्य संस्कृतसप्ताहस्य अन्तर्गतं निबन्धप्रतियोगिता, भाषाक्रीडा तथा श्लोकान्त्याक्षरीप्रतियोगिता आयोजिताः। सर्वासु प्रतियोगितासु बटुकैः उत्साहपूर्वकं सहभागिता कृता। कार्यक्रमस्य मार्गदर्शनं संस्कृतभारत्याः कार्यकर्त्रा सत्येन्द्रपाठकेन कृतम्।

## निबन्धप्रतियोगितायां संस्कृतेन विचाराभिव्यक्तिः

कार्यक्रमस्य प्रथमचरणे निबन्धप्रतियोगिता आयोजिताभवत्। अस्यां बटुकैः गुरुकुलम् इति विषयेषु संस्कृतभाषया स्वकीयाः विचाराः लिखितरूपेण प्रस्तुताः। सत्येन्द्रपाठकेन उक्तं यत् निबन्धप्रतियोगितायाः उद्देश्यं बटुकानां संस्कृते लेखनक्षमतायाः विकासः, स्वविचारान् शुद्धसंस्कृते अभिव्यक्तुं तेषां प्रोत्साहनम् अस्ति। लेखनाभ्यासेन भाषायां बालकानां वास्तविकं प्रभुत्वं विकसितुं शक्नोति इति तेन प्रतिपादितम्।

## भाषाक्रीडाभिः संस्कृताध्ययनं सहजम्

निबन्धप्रतियोगितायाः अनन्तरं बटुकानां कृते विविधाः भाषाक्रीडाः आयोजिताः। तासां माध्यमेन संस्कृतशब्दानां प्रयोगः, वाक्यरचना तथा सम्भाषणस्य अभ्यासः कारितः। बटुकाः विभिन्नेषु समूहेषु विभज्य उत्साहपूर्वकं भाषाक्रीडासु सहभागितां कृतवन्तः। भाषाक्रीडाभिः संस्कृताध्ययनं सहजं रोचकं च भवति तथा बालकेषु संस्कृतभाषायाः प्रति विद्यमानः भयभावः अपि दूरीभवति इति सत्येन्द्रपाठकेन उक्तम्।

## श्लोकान्त्याक्षर्यां बटुकानाम् उत्साहः

कार्यक्रमस्य प्रमुखाकर्षणं श्लोकान्त्याक्षरी-प्रतियोगिता आसीत्। प्रतियोगितायां बटुकाः द्वयोः समूहयोः विभक्ताः। एकस्मिन् समूहस्य पठितस्य श्लोकस्य अन्तिमाक्षरेण आरभ्यमाणस्य अन्यस्य श्लोकस्य पाठनं द्वितीयसमूहेन करणीयम् आसीत्। अस्यां प्रतियोगितायां बटुकैः श्रीमद्भगवद्गीता, रामायणम् तथा अन्येभ्यः संस्कृतग्रन्थेभ्यः श्लोकाः स्मृत्वा उत्साहेन प्रस्तुताः। प्रतियोगितया बटुकानां स्मरणशक्तेः, श्लोकज्ञानस्य, संस्कृतभाषाप्रयोगस्य च विकासः अभवत्।

## संस्कृतप्रयोगाय प्रेरणा

कार्यक्रमस्य समापनावसरे सत्येन्द्रपाठकेन सर्वेभ्यः प्रतिभागिबटुकेभ्यः उत्साहपूर्णसहभागितायै शुभकामनाः प्रदत्ताः। तेन उक्तं यत् संस्कृतभारत्याः उद्देश्यं केवलं प्रतियोगितानाम् आयोजनं न, अपितु बालकेषु संस्कृतभाषायाः प्रति स्वाभाविकानुरागस्य निर्माणम् अस्ति। 'मम स्थाने संस्कृतम्' इति ध्येयवाक्यं स्वीकृत्य बटुकाः दैनिकजीवने संस्कृतभाषायाः प्रयोगं कुर्वन्तु इति सः आह्वानं कृतवान्।





# अन्तिमसोमवासरे मिथिलाकलामञ्चस्य ऑनलाइन-भक्तिसन्ध्यायां शिवभक्त्या लीनः अभवत् सायंकालः




## “पूजार्थं शङ्करं प्रति अहं पूजारिणी आगता...” “विद्यापतेः रचनासु शिवभक्तेः अत्यन्तं महत्त्वपूर्णं स्थानम् अस्ति”- चौधरी

हिमसंस्कृतवार्ताः- बोकारो।
अन्तर्राष्ट्रीय- मैथिलीपरिषदः एककस्य मिथिलाकलामञ्चस्य तत्त्वावधानेन श्रावणमासस्य अन्तिमसोमवारस्य उपलक्ष्ये ऑनलाइन-माध्यमेन भव्यायाः भक्तिसन्ध्यायाः आयोजनम् अभवत्। प्रायः १५० निमेषपर्यन्तं प्रवृत्ते अस्मिन् कार्यक्रमे मिथिलायाः आराध्यदेवस्य भगवान् महादेवस्य स्तुतयः, विद्यापतेः पदानि, मैथिलीभक्तिगीतानां भावपूर्णाः प्रस्तुतयः देशस्य नेपालस्य च विभिन्नप्रदेशेभ्यः सम्बद्धान् मैथिल- मैथिलानी- समाजस्य सदस्याँन् शिवभक्तिरसेन आप्लावितवन्तः। अन्तर्राष्ट्रीय-मैथिलीपरिषदः संस्थापकस्य डॉ. धनाकरठाकुरस्य गरिमामयी उपस्थितौ, घाटशिलामहाविद्यालयस्य प्राचार्यस्य डॉ. रविन्द्रकुमारचौधरीस्य अध्यक्षतायां सम्पन्नस्य अस्य कार्यक्रमस्य कुशलं सञ्चालनं मिथिलाकलामञ्चस्य संयोजिका आसनसोलस्थिता पूनमझा अकरोत्। कार्यक्रमे वाराणसीतः अशोकमिश्रेण “शिवशम्भुः कैलाशपतिः, महादेवः भोला, अहं महान् अज्ञानी, स्वीकुरु मम पूजाम्” तथा “भज मन हरिहरं, शिवं जप-तपं कर्तुं कोऽपि नास्ति...” इति भक्तिगीतयोः प्रस्तुतीकरणं कृतम्। मिथिलाकलामञ्चस्य मीडियाप्रभारी, प्रतिष्ठितगायकः बोकारोनिवासी अरुणपाठकेन “पूजार्थं शङ्करं प्रति अहं पूजारिणी आगता...” इति गीतं प्रस्तुतम्। अगरतलास्थितया मीनाक्षीझया “शृणुयात् शृणुयात् भो बाबा...”, दिल्लीस्थया प्रतिभाझया “शिवपदपङ्कजं ममापि कुरु कल्याणम्...”, गुजरातस्य सूरतनगरस्थया संगीताताकुरया “बाबा, जीवनं जातं पर्वतमिव...”, नेपालस्य भैरहवास्थितेन सोनूताकुरेण “बाबा, रचयित्वा रचयित्वा लिखिष्यामि...” इत्यादीनां भक्तिगीतानां सुमधुराः प्रस्तुतयः कृताः। आन्ध्रप्रदेशतः ब्यूटीदिवेशझया “भोलेबाबायाः अङ्गणे कुत्र गच्छेयम्...”, राजस्थानस्य जयपुरतः रेणुझया “ममापि तु क्रिया निहाला...”, नोएडास्थितया पुष्पापाठकेन “कथं यत्नं कुर्याम्...”, अहमदाबादतः रञ्जुमिश्रेण “अद्य नाथ! एकं व्रतं महासुखदं भवति...”, आसनसोलस्थया पूनमझया नचारी-भजनयोः प्रस्तुतीकरणं कृतम्। धनबादतः आशामिश्रेण “अहो शिवमहेश्वरशम्भुभोलादानी...”, दुर्गापुरतः जयरामझेन “विपत्तेः पीडया पीडिता अहं मातः, मां क्रोडे स्थापय, तव बालकः अस्मि...”, कोलकातास्थितया हिमाद्रीमिश्रेण “रुणझुण्- रुणझुण् मनसः पायलिकां धृत्वा नृत्यति...”, राँचीस्थया नमितामिश्रेण “विपदा पतिता अस्ति भोलेदानी...” इत्यादीनां गीतानां सुमधुराभिः प्रस्तुतिभिः वातावरणं शिवमयं कृतम्। विभिन्नप्रदेशेभ्यः सम्बद्धानां कलाकाराणां एताभिः प्रस्तुतिभिः मैथिलीगीतसङ्गीतस्य विविधता व्यापकता च सुस्पष्टतया प्रकाशिता। मिथिलाकलामञ्चस्य एषा भक्तिसन्ध्या मिथिलायाः भक्तिभावं, सङ्गीतं, लोकभाषां सांस्कृतिकचेतनां च एकस्मिन् मञ्चे संयोजयन्ती सफलः कार्यक्रमः अभवत्। श्रावणमासस्य अन्तिमसोमवारस्य अवसरे आयोजिते अस्मिन् कार्यक्रमे देशस्य नेपालस्य च विभिन्नप्रदेशेषु निवसन्तः मैथिल- मैथिलानीसमाजस्य जनाः ऑनलाइन-माध्यमेन एकसूत्रे सम्बद्धाः। अनेन सामूहिकशिवभक्तेः, सांस्कृतिकैकतायाः, मैथिलीसंस्कारस्य तथा सनातनपरम्परायाः प्रति जागरणस्य सन्देशः प्रसारितः। कार्यक्रमस्य चर्चायां विद्यापतेः “बड़ सुखसार पाओल तुअ तीरे...” इत्यादीनां लोकसांस्कृतिकाभिव्यक्तीनां उल्लेखः कृतः। वक्तृभिः उक्तं यत् विद्यापतेः पदानां शिवभक्तिपरम्परायाश्च प्रभावः केवलं मिथिलायामेव न, अपि तु अङ्गिकाप्रदेशे समीपस्थेषु च क्षेत्रेषु व्यापकः दृश्यते। वक्तारः अवदन् यत् भारतीयनारीणां आदर्शपतिरूपेण महादेवस्य व्यक्तित्वं विशेषम् आकर्षणं धारयति। सः तादृशः पतिः अस्ति यः स्वपत्न्याः सम्मानस्य रक्षणार्थं ताण्डवमपि कर्तुं शक्नोति। अस्मिन् दृष्टिकोणे महादेवस्य चरित्रं भारतीयलोकमानसे विशिष्टम् आदर्शं प्रस्तुतयति।कार्यक्रमस्य अध्यक्षः घाटशिलामहाविद्यालयस्य प्राचार्यः डॉ. रविन्द्रकुमारचौधरी स्वीयसम्बोधने अवदत् यत् महादेवः मिथिलायाः आराध्यदेवः अस्ति तथा च विद्यापतेः रचनासु शिवभक्तेः अत्यन्तं महत्त्वपूर्णं स्थानम् अस्ति। विद्यापतेः पदैः मिथिलायाः लोकचेतनायां शिवः अत्यन्तमात्मीयभावेन प्रतिष्ठापितः अस्ति। सः अवदत् यत् विद्यापतेः शिवभक्तिः केवलं धार्मिकश्रद्धा न, अपि तु मिथिलायाः लोकस्मृतेः, भाषायाः, सङ्गीतस्य सांस्कृतिकपरिचयस्य च महत्त्वपूर्णः अंशः अस्ति।
कार्यक्रमे डॉ. धनाकरठाकुरः अवदत् यत् प्रायः १५० निमेषपर्यन्तं प्रवृत्ते अस्मिन् कार्यक्रमे कोलकातातः सूरतपर्यन्तम्, अगरतलातः सूरतपर्यन्तं, नेपालतः नेल्लोरपर्यन्तं विभिन्नप्रदेशेभ्यः प्रतिभागिनः स्वीयं मैथिलीसंस्कारं सांस्कृतिकसम्बन्धं च प्रदर्शितवन्तः। सः अवदत् यत् भौगोलिकदूरत्वे सति मैथिलीभाषा, गीतं, संस्कृतिः तथा सनातनपरम्परा मैथिलसमाजं एकसूत्रे संयोजयति। सः देश-नेपालयोः सम्बद्धान् सर्वान् मैथिल-मैथिलानीसमाजस्य जनान् आह्वयत् यत् ते सनातनसंस्कृतेः, स्वभाषायाः, लोकपरम्परायाः सांस्कृतिकविरासतस्य च प्रति जागरूकतां वर्धयेयुः, एतां विरासतं भाविपीढीभ्यः प्रदातुं प्रयत्नं कुर्वन्तु

# वेदप्रचारसप्ताहस्य द्वितीयदिवसे श्लोकोच्चारणप्रतियोगितायाः आयोजनम्






**वार्ता प्रेषक -डा विमलेश झा,भागलपुर,बिहार**

बिहारराज्यस्यडीएवीपब्लिक् स्कूल, बरारी, भागलपुरविद्यालयस्य परिसरे वेदप्रचारसप्ताहस्य द्वितीयदिने विशेषप्रार्थनासभायाः आयोजनं जातम्। अस्मिन् अवसरे छात्राः भक्तिपूर्णे वातावरणे “अधरं मधुरं वदनं मधुरं, मधुराधिपतेरखिलं मधुरम्” इति गीतस्य सुन्दरं प्रस्तुतीकरणं कृतवन्तः।
कार्यक्रमे विद्यालयस्य शिक्षिका श्रीमती वसुन्धरा कुमारी “मनसा सततं स्मरणीयम्” इति गीतस्य पङ्क्तीः श्रावयित्वा छात्रेभ्यः वैदिकसंस्कृतेः, संस्काराणां तथा वैदिकविचारधारायाः विषये महत्त्वपूर्णां चर्चां कृतवती। अपि च वेदप्रचारसप्ताहस्य अन्तर्गते विविधप्रतियोगितानां श्रृङ्खलायाम् अद्य श्लोकोच्चारणप्रतियोगितायाः अपि आयोजनम् अभवत्। अस्यां प्रतियोगितायां षष्ठकक्षातः नवमकक्षापर्यन्तं प्रायः शतं छात्राः उत्साहपूर्वकं भागं गृहीतवन्तः। छात्राः नीतिश्लोकानां, श्रीमद्भगवद्गीतायाः श्लोकानां तथा श्रीकृष्णचरितसम्बद्धानां श्लोकानां प्रभावपूर्णं शुद्धं च उच्चारणं कृत्वा सम्पूर्णं सभागारं श्लोकमयं कृतम्।
प्रतियोगितायाः निर्णायकमण्डल्यां श्रीमती मुक्ता वर्मा तथा श्रीमती वसुन्धरा कुमारी इत्येताभ्यां महत्त्वपूर्णं योगदानं प्रदत्तम्। कार्यक्रमस्य सञ्चालनं डा. विमलेश झा इत्यनेन कृतम्। अस्मिन् अवसरे विद्यालयस्य प्राचार्यः सह सहायकक्षेत्रीयाधिकारी श्रीमान् अनिलकुमारमहोदयः स्वीयसम्बोधने अवदत् यत् छात्रैः अधिकाधिकाः संस्कृतश्लोकाः कण्ठस्थीकरणं कर्तव्यम्। श्लोकानां माध्यमेन बालकाः नीतिं, सदाचारं जीवनमूल्यानि च ज्ञातुं शक्नुवन्ति। श्लोकानां शुद्धोच्चारणेन भाषायाः शुद्धता वर्धते तथा संस्कृतभाषायां छात्राणां रुचिरपि विकसिताः भवति। सः समेषां प्रतिभागिनां कृते शुभकामनां अभिनन्दनं च प्रदत्तवान्।कार्यक्रमस्य, सफलसञ्चालने श्री आशीषकुमारदासः, श्रीमती प्रगतिमिश्रा, श्रीमती प्रतिमा राय चौधरी इत्येतेषां सह विद्यालयस्य सर्वेषां शिक्षकाणां, शिक्षिकाणां तथा शिक्षकेतरकर्मचारिणां योगदानं प्रशंसनीयम् आसीत्।

# ६४ कलाप्रदर्शिन्यै संस्कृतभारतीशाखा-वणी-नगरवासिनाम् आनन्दवर्धकः प्रतिसादः




**वार्ताहरः - जगदीश डाभी**

प्राचीनभारते कौशल्यपूर्णशिक्षणरूपेण सुदीर्घकालात् प्रचलितानाम्, मानव-जीवनाय सुन्दरं, सम्पन्नं, सुसंस्कृतम्, अभिजातं रसास्वादयुक्तं स्वावलम्बिनं च कुर्वतीनां ६४ कलानां परिचयप्रदानस्य निमित्तेन संस्कृतभारतीशाखा-वणी तथा च लोकमान्यटिळकमहाविद्यालयस्य संस्कृतविभागस्य संयुक्ततत्त्वावधाने संस्कृतसप्ताहस्य अवसरे स्थानीय-जैताई-देवस्थाने आयोजितायै ६४ कलाप्रदर्शिन्यै वणी-नगरस्य जनानाम् उत्साहपूर्णः प्रचुरः च प्रतिसादः प्राप्तः।सेवानिवृत् प्रधानाचार्यैः तथा च 'तरुण भारत' इति वृत्तपत्रस्य प्रतिनिधिभिः गजाननकासावार-महोदयैः भारतमातुः प्रतिमायाः पूजनं कृत्वा अस्याः प्रदर्शिन्याः उद्घाटनम् कृतम्। अस्मिन् अवसरे शिक्षणप्रसारकमण्डल-वणी इत्यस्य सहसचिवः श्रीअशोकसोनटक्के-महोदयः तथा च संस्कृतभारत्याः प्रान्तकार्यकारिणीसदस्या प्रणिता भाकरे-महोदया विशेषरूपेण उपस्थितौ आस्ताम्।
अत्याधुनिककाले अपि स्वरोजगारस्य विविधाः अवसराः एतासां कलानां माध्यमेन कथं प्राप्तुं शक्यन्ते इति दृष्ट्वा प्रेक्षकैः विशेषप्रसन्नता प्रकटीकृता।
संस्कृतभारतीशाखा-वणी इत्यस्य नगराध्यक्षस्य तथा लोकमान्यटिळकमहाविद्यालयस्य संस्कृतविभागप्रमुखस्य विद्यावाचस्पतिः प्रा. स्वानन्दगजाननपुण्ड-महोदयस्य संकल्पनया प्रयत्नैः च साकारीकृतायाः अस्याः प्रदर्शिन्याः कारणात् केवलं नामतः ज्ञाताः एताः ६४ कलाः वास्तविकतया काः आसन्? तासां स्वरूपं कीदृशम् आसीत्? अद्यतने काले अपि ताः कथं उपयोगिन्यः सन्ति? इति प्रथमवारमेव ज्ञातुं पारिम् इति स्वरूपाः बहुभिः दर्शकैः दत्ताः प्रतिक्रियाः अस्य उपक्रमस्य महत्त्वम् अधोरेखितं कुर्वत्यः आसन्।अस्माकं पूर्वजैः कतिषु विविधविषयेषु कियत् सूक्ष्मः कियत् व्यापकः च विचारः कृतः इति दृष्ट्वा दर्शकानां मुखेषु प्रकटितः विस्मयः, आश्चर्यम्, अभिमानः च अस्याः प्रदर्शिन्याः वास्तविकी उपलब्धिः अस्ति। प्रदर्शिन्याः सफलतायै संस्कृतभारत्याः उपाध्यक्षः प्रशान्त भाकरे, सचिवः महेश पुण्डः, प्रा. प्रीतम सरगः, सुनील इन्दुवामन ठाकरे, सुखदा बुजोणे च विशेषपरिश्रमं कृतवन्तः।

# महर्षिपाणिनि- संस्कृत- वैदिक- विश्वविद्यालये "भारतीयज्ञान- परम्परायाः वाहिकायाः संस्कृतभाषाया वैश्विकप्रसार- प्रचारः दुष्प्रचारश्च " इति विषयमाधारीकृत्य आभासीयपटलमाध्यमेन व्याख्यानं सम्पन्नम्





**हिमसंस्कृतवार्ताः- डॉ. विजयकुमारः**

महर्षिपाणिनि- संस्कृत- वैदिक- विश्वविद्यालयस्य संस्कृत- शिक्षण- प्रशिक्षण- ज्ञानविज्ञान- संवर्धन- केन्द्रेण समायोजितस्य संस्कृत- सप्ताह- समारोहस्य द्वितीयदिवसे "भारतीयज्ञानपरम्परा की वाहिका संस्कृत भाषा का वैश्विक प्रसार, प्रचार और दुष्प्रचार" इति विषयमाधारीकृत्य आभासीय- पटलमाध्यमेन व्याख्यानं जातम्। व्याख्याकर्तारः आसन् गुजरातविश्वविद्यालयस्य भाषासाहित्यभवनस्य पूर्वनिदेशकाः प्रो. वसन्तकुमार भट्टमहोदयाः। ते पी.पी.टी माध्यमेन भारतीयज्ञानपरम्परायाः इतिहासं वर्णयन्तः प्राचीनरीतिं ब्राह्मी- खरोष्ठीत्यादिलिपिं, संस्कृतभाषायाः प्रचारस्य मार्गं, दुष्प्रचारस्य रीतिं च वर्णितवन्तः। तैरुक्तं यत् यतो हि वयं संस्कृतविषयमाधारीकृत्य वर्तामहे, तस्मात् तस्य प्राचीनम् इतिहासमस्माभिः अवश्यं ज्ञातव्यम्। इतिहासज्ञानेनैव भविष्यत्संस्कृतभवनस्य निर्माणं भविष्यति। विश्वविद्यालयपक्षतः महोदस्य स्वागतं विशिष्टसंस्कृतविभागस्य विभागाध्यक्षा पूजा मनमोहन उपाध्यायवर्या कृतवती। आध्यक्षं निर्वहतां विश्वविद्यालयस्य कुलगुरूणां संस्कृतस्य गौरवविषये प्रेरणाप्रदायकवचोभिः सर्वे उद्बोधिताः जाताः। कार्यक्रमस्य आरम्भे वैदिकं मङ्गलाचरणं वेदविभागस्य अध्यापकः डॉ. पतञ्जलिकुमारपाण्डेयमहोदयः, अन्तिमे धन्यवादज्ञापनं च साहित्यविभागस्य अध्यापकः डॉ. गङ्गाशरणव्यासमहोदयः कृतवान्। कार्यक्रमस्य संयोजकः केन्द्रस्य समन्वयकः डॉ. अखिलेशकुमारद्विवेदी, सहसंयोजकश्च डॉ. शैवाल आचार्यः आसीत्। कार्यक्रमस्य सञ्चालनं डॉ. शैवाल आचार्येण सम्पादितम्।

# हिमाचल-प्रदेश-राजकीय-संस्कृत-शिक्षक-परिषदा चम्बा-मण्डले उप-शिक्षा-निदेशकाय शुभकामना-सन्देश-पत्रं समर्पितम्



हिमसंस्कृतवार्ता, चम्बा (हिमाचलप्रदेशः)

चम्बा। हिमाचल-प्रदेश-राजकीय-संस्कृत-शिक्षक-परिषदः चम्बा-शाखायाः तत्त्वावधाने 'संस्कृत-सप्ताहस्य' पावनोपलक्ष्ये प्राथमिक-उप-शिक्षा-निदेशकाय सप्रेमं मेलनं कृत्वा शुभकामना-सन्देश-पत्रं सादरं समर्पितम्।अस्मिन् अवसरे परिषद्-पदाधिकारिभिः सह उप-शिक्षा-निदेशक-महोदयस्य संस्कृतभाषायाः प्राचीनता, तस्याः सांस्कृतिक-महत्त्वं तथा च वर्तमान-युगे तस्याः प्रासङ्गिकताम् उपयोगितां च अधिकृत्य एका सार्थका गम्भीरा च विचार-चर्चा सञ्जाता।

**उप-शिक्षा-निदेशकस्य उद्बोधनम्**

उप-शिक्षा-निदेशक-महोदयेन संस्कृत-सप्ताहस्य सर्वेभ्यः शिक्षकेभ्यः परिषद्-सदस्येभ्यः च हार्दिकाः शुभाशयाः अभिनन्दनानि च व्याहृतानि। तेनोक्तं यत्— "संस्कृतं केवलं भाषा न अपितु अस्माकं समृद्ध-संस्कृतेः जीवनमूल्यानां च आधारशिला वर्तते।" एतदतिरिक्तं महोदयेन चम्बा-मण्डले परिषदा संस्कृतभाषायाः प्रचाराय प्रसाराय च क्रियमाणानां स्तुत्य-प्रयासानां भूरिशः प्रशंसा कृता, भविष्येऽपि एतादृश-कार्याणां कृते पूर्णसहयोगस्य आश्वासनं दत्तम्।

**उपस्थिताः गणाग्रण्याः**

अस्मिन् गरिमामये कार्यक्रमे परिषद्-पक्षतः प्रमुखाः पदाधिकारिणः उपस्थिताः आसन्—

***श्री हेम सिंहः (अध्यक्षः)***
***श्री सरन दासः (महासचिवः)***
***श्री डोली रामः (राज्य-उपाध्यक्षः)***
***श्री अमर सेनः (वरिष्ठ-सदस्यः)***
***श्री अम्बिका प्रसादः (सदस्यः)***
***श्री सुरेशः (कोषाध्यक्षः)***

कार्यक्रमावसाने परिषद्-अध्यक्षेण श्री-हेम-सिंहेन उप-शिक्षा-निदेशक-महोदयस्य हार्दिकः धन्यवादः कृतः, देववाण्याः संरक्षणाय संवर्धनाय च परिषद् निरन्तरं कटिबद्धा भविष्यति इति सङ्कल्पः पुनरुच्चारितः।

# रक्षाबन्धनस्य शास्त्रीयस्वरूपम् आधुनिकसन्दर्भे तन्महत्त्वञ्च

भारतीयसंस्कृतिः पर्वणां संस्कृतिः अस्ति। अस्माकं प्रत्येकं पर्व केवलम् उत्सवस्वरूपं न भवति, अपितु जीवनमूल्यानां, संस्काराणां, कर्तव्यबोधस्य, सामाजिकसमरसतायाः च प्रेरणां ददाति। तादृशेषु महत्त्वपूर्णेषु पर्वसु रक्षाबन्धनपर्व अपि प्रमुखम् अस्ति। एतत् पर्व भ्रातृ-भगिन्योः पवित्रस्नेहस्य, परस्परविश्वासस्य, मंगलकामनायाः, संरक्षणस्य च भावनां सुदृढं करोति।
रक्षाबन्धनस्य भावः केवलं भ्रात्रे भगिन्या रक्षासूत्रबन्धनपर्यन्तं सीमितः नास्ति। भारतीयपरम्परायां 'रक्षा' इति शब्दस्य अर्थः अत्यन्तं व्यापकः अस्ति। धर्मस्य, सत्यस्य, संस्कृतेः, परिवारस्य, समाजस्य, पर्यावरणस्य, राष्ट्रस्य च संरक्षणम् अपि रक्षायाः अन्तर्गतं भवति।
वैदिक वाङ्मये मनुष्यस्य कल्याणाय, आरोग्याय, दीर्घायुषे, अभयाय, समृद्धये च अनेकाः मंगलकामनाः प्राप्यन्ते। विशेषतः अथर्ववेदे रक्षासम्बद्धाः मन्त्राः विविधेषु सन्दर्भेषु दृश्यन्ते। वैदिकजीवने मन्त्रैः, यज्ञैः, आशीर्वादैः, मंगलसंकल्पैश्च जनानां कल्याणस्य तथा संरक्षणस्य भावना अभिव्यज्यते।
अतः हस्ते बध्यमानं रक्षासूत्रं केवलं सूत्रखण्डमात्रं नास्ति, अपितु शुभसंकल्पस्य, मंगलकामनायाः, उत्तर-दायित्वस्य च प्रतीकमपि अस्ति। रक्षासूत्रस्य प्रत्येकं तन्तुः मन्ये अस्मान् स्मारयति यत्— अस्माभिः स्वकीयसम्बन्धानां, संस्काराणां, कर्तव्यानां, जीवनमूल्यानां च संरक्षणं कर्तव्यम्।

### श्रावणपूर्णिमायाः महत्त्वम्

रक्षाबन्धनपर्व श्रावणमासस्य पूर्णिमायां तिथौ आचर्यते। श्रावणपूर्णिमा भारतीयधार्मिक-परम्परायां विशेषमहत्त्वं भजते। अस्यां तिथौ प्राचीनकाले वेदाध्ययनस्य, ऋषिस्मरणस्य, उपाकर्मणः, यज्ञोपवीत-सम्बद्धानां च धार्मिकानुष्ठानानां परम्परा आसीत्। अतः श्रावणपूर्णिमायाः स्वरूपं केवलं पारिवारिकपर्वरूपेण नास्ति, अपितु अध्ययनस्य, संस्कारस्य, आत्मशुद्धेः, ऋषिपरम्परायाः, धार्मिककर्तव्यस्य च दिवसः अपि अस्ति।

### शास्त्रेषु रक्षासूत्रस्य परम्परा

भारतीयधार्मिकानुष्ठानेषु रक्षासूत्रबन्धनस्य परम्परा प्राचीनकालादेव दृश्यते। यज्ञेषु, मांगलिककार्येषु तथा विविधेषु संस्कारकर्मसु आचार्यः यजमानस्य हस्ते रक्षासूत्रं बध्नाति। तस्य मुख्यो भावः भवति—मंगलस्य, धर्मस्य, स्वास्थ्यस्य, आयुषः, कल्याणस्य च कामना।
रक्षासूत्रबन्धनसमये मनसि एषः संकल्पः भवेत्—
"अहं धर्मे, सत्ये, सदाचारे च दृढतया स्थितः भविष्यामि। स्वस्य तथा स्वकीयानां कल्याणाय यथाशक्ति प्रयत्नं करिष्यामि।"
अतः रक्षासूत्रं कर्तव्यबोधस्य अपि प्रतीकम् अस्ति।

### पौराणिकपरम्परायां रक्षाबन्धनम्-

रक्षाबन्धनस्य सम्बन्धेन भारतीयलोकपरम्परायां विविधाः पौराणिककथाः प्रचलिताः सन्ति। तासु देवराजस्य इन्द्रस्य तथा शच्याः कथा प्रसिद्धा अस्ति। कथानुसारं देवासुरसंग्रामे शच्या इन्द्रस्य विजयाय रक्षासूत्रं बद्धम्।
एषा कथा अस्मान् बोधयति यत् रक्षासूत्रं अभयस्य, आत्मविश्वासस्य, विजयस्य, मंगलसंकल्पस्य च प्रतीकम् अस्ति।
तथैव राजा बलि-वामनावतारयोः कथाः अपि रक्षाबन्धनस्य लोकपरम्परायां प्रसिद्धः वर्तते। एतासां कथानां मूलसन्देशः अस्ति यत् रक्षा केवलं शरीरस्य न भवति, अपितु धर्मस्य, सत्यस्य, कर्तव्यस्य, सदाचारस्य च अपि आवश्यकी अस्ति।

### रक्षाबन्धनस्य सामान्यविधिः-

रक्षाबन्धनदिने प्रातःकाले स्नानं कृत्वा शुद्धानि वस्त्राणि धारयेत्। गृहं स्वच्छं कृत्वा इष्टदेवस्य पूजनं स्मरणं वा कुर्यात्। ततः रक्षाबन्धनस्य विधिः सामान्यतः एवं भवति—
भ्राता अथवा यस्य हस्ते रक्षासूत्रं बन्धनीयं सः शुद्धे आसने उपविशेत्।
इष्टदेवस्य, कुलदेवतायाः, परमात्मने च स्मरणं कुर्यात्।
भ्रातुः ललाटे तिलकं धारयेत्।
अक्षतान् पुष्पाणि च समर्पयेत्।
दक्षिणहस्तस्य मणिबन्धे रक्षासूत्रं बध्नीयात्।
मंगलभावनया आरतीं कुर्यात्।
मधुरपदार्थेन परस्परं मुखं मधुरं कुर्यात्।
भगिनी भ्रातुः दीर्घायुः, आरोग्यं, यशः, सुखं, समृद्धिं च कामयेत्।
भ्राता अपि भगिन्याः सम्मानस्य, सुरक्षायाः, सुखस्य च संरक्षणाय संकल्पं कुर्यात्।




लेखिका -डॉ. सुमन रानी अध्यक्षा , स्वामी - दयानन्द -सरस्वती - पीठः, हरियाणा केन्द्रीयः विश्वविद्यालयः, महेन्द्रगढ़म्

### रक्षासूत्रबन्धनसमये प्रसिद्धः श्लोकः—

**येन बद्धो बली राजा**
**दानवेन्द्रो महाबलः।**
**तेन त्वामपि बध्नामि**
**रक्षे मा चल मा चल।।**

**अस्य भावार्थः—**
येन रक्षासूत्रेण महाबलवान् दानवेन्द्रः राजा बलिः बद्धः आसीत्, तेनैव रक्षासूत्रेण अहं त्वां बध्नामि। हे रक्षे! त्वं स्थिरा भव, स्थिरा भव।रक्षाबन्धनस्य महत्त्वं केवलं भ्रातृ-भगिनीसम्बन्धे सीमितं नास्ति, अपितु भारतीयपरम्परायां गुरु-शिष्ययोः, सामाजिकजनानां, मित्राणां, सैनिकानां, राष्ट्रसेवकानां च मध्ये अपि रक्षासूत्रबन्धनस्य परम्परा विकसिताभवत्।
अतः रक्षाबन्धनम् सामाजिकैकतायाः, भ्रातृत्वस्य, सौहार्दस्य, परस्परविश्वासस्य च पर्व अस्ति।
अस्मिन् पर्वणि समाजे दुर्बलानां संरक्षणम्, वृद्धानां सेवा, बालिकानां सुरक्षा, नारीणां सम्मानः, राष्ट्रस्य एकता, पर्यावरणस्य संरक्षणं च अस्माकं रक्षासंकल्पस्य भागाः भवेयुः।

### नारीसम्मानस्य सन्देशः

रक्षाबन्धनस्य आधुनिकसन्दर्भे एकः महत्त्वपूर्णः संदेशः अस्ति— नारीसम्मानः।
भगिनी केवलं रक्षणस्य अधिकारिणी नास्ति, सा परिवारस्य, समाजस्य, संस्कृतेः च निर्माणे महत्त्वपूर्णां भूमिकां निर्वहति। अतः रक्षाबन्धनस्य वास्तविकः संकल्पः भवेत्—
"वयं परस्परं सम्मानं, स्वाभिमानं, गरिमां, अधिकारान् च रक्षिष्यामः।"
यत्र नारी सम्मानिता भवति,
तत्रैव परिवारः, समाजः,
राष्ट्रं च सुदृढं भवति।

### पर्यावरणसंरक्षणस्य सन्देशः-

भारतीयसंस्कृतौ प्रकृतिः मातृरूपेण पूज्यते। वृक्षाः, नद्यः, पर्वताः, भूमिः, वायुः, जलं च अस्माकं जीवनस्य आधारभूतानि तत्त्वानि सन्ति।अतः रक्षाबन्धनदिने वृक्षेभ्यः रक्षासूत्रं बद्ध्वा तेषां संरक्षणस्य संकल्पः करणीयः। जलसंरक्षणम्, वृक्षारोपणम्, नदीनां स्वच्छता, पर्यावरणसंरक्षणं च अस्माभिः आचरणीयम्।
एवं च रक्षाबन्धनस्य सूत्रं मानवस्य प्रकृत्या सह आत्मीयसम्बन्धमपि दृढीकरोति।


### आधुनिकयुगे रक्षाबन्धनस्य प्रासङ्गिकता-

अद्य विज्ञानस्य प्रौद्योगिक्याश्च विकासेन मानवजीवनं सुखकरं जातम्, किन्तु पारिवारिकदूरत्वं, सामाजिकएकाकित्वं, पर्यावरणसंकटं, अवसादः, मानवीयसंवेदनानां ह्रासः च आधुनिकसमाजस्य प्रमुखाः समस्याः सन्ति।
अस्मिन् सन्दर्भे रक्षाबन्धनम् अस्मान् स्मारयति—
**प्रेमभावस्य रक्षणं कुर्याम।**
**विश्वासस्य रक्षणं कुर्याम।**
**संस्काराणां रक्षणं कुर्याम।**
**कर्तव्यस्य रक्षणं कुर्याम।**
**प्रकृतेः संरक्षणं कुर्याम।**
समाजस्य राष्ट्रस्य च परिपालनं कुर्याम। एवमेव रक्षाबन्धनोत्सवः न केवलमत्सवमात्रं भवति, अपितु जीवनमूल्यानां पुनः स्मरणस्य पवित्रः अवसरः अपि भवति।

उपसंहारः-रक्षाबन्धनं भारतीयसंस्कृतेः अत्यन्तं पवित्रं, भावपूर्णं, जीवनमूल्यसमन्वितं च पर्व अस्ति। वैदिकपरम्परायां विद्यमानया मंगलकामनया, रक्षासूत्रपरम्परया, शास्त्रीयसंस्कारैः, पौराणिककथाभिः, भ्रातृ-भगिन्योः स्नेहेन च अस्य स्वरूपं समृद्धं जातम्।
हस्ते प्रतिबद्धं लघुरक्षासूत्रं वस्तुतः महत्तरस्य संकल्पस्य प्रतीकम् अस्ति। एतद् अस्मान् बोधयति यत्— जीवने अधिकारैः सह कर्तव्याः अपि सन्ति, प्रेम्णा सह उत्तरदायित्वम् अपि अस्ति, सम्बन्धैः सह संरक्षणस्य भावनाऽपि वर्तते। अतः अस्मिन् रक्षाबन्धनपर्वणि वयं केवलं रक्षासूत्रं न बध्नीयाम, अपितु हृदये प्रेम्णः, सत्यस्य, धर्मस्य, संस्कृतेः, नारीसम्मानस्य, सामाजिकसमरसतायाः, पर्यावरणसंरक्षणस्य, राष्ट्रनिष्ठायाश्च दृढं सूत्रं बध्नीयाम।
अयमेव रक्षाबन्धनस्य वास्तविकः सन्देशः।
अयमेव भारतीयसंस्कृतेः शाश्वतः संस्कारः।
"सर्वे भवन्तु सुखिनः, सर्वे सन्तु निरामयाः।
सर्वे भद्राणि पश्यन्तु, मा कश्चिद् दुःखभाग्भवेत्॥"
रक्षाबन्धनस्य हार्दिकाः मंगलकामनाः



# संस्कृतशिक्षायाः पतनम् -: केवलं प्रमाणपत्राणि वा यथार्थं ज्ञानम्?




**अमन-पाण्डेयः (विशेष-प्रतिनिधिः) विद्यार्थी,**
**श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृत-विश्वविद्यालयः, नवदेहली**

**"भाषासु मुख्या मधुरा दिव्या गीर्वाणभारती।"**

अद्यत्वे देवभाषायाः संस्कृतस्य प्राङ्गणे गम्भीराह्वानानि उपस्थितानि सन्ति। विश्वस्य प्राचीनतमा, पूर्णतया वैज्ञानिकी तार्किकी च इयं भाषा अधुना केवलं परीक्षोन्मुखाध्ययनेन, उपाधिवितरणप्रक्रमेण च स्वकीयां शास्त्रीयगम्भीरतां जहाति। सम्पूर्णदेशस्य उच्चशिक्षणसंस्थानेभ्यः आरभ्य संस्कृतविद्यालयान् यावत् पठन-पाठनं केवलम् औपचारिकतामात्रं सञ्जातम्। यदि समये एव अस्य तार्किकं वैज्ञानिकं च समाधानं न विहितं, तर्हि अस्याः भाषायाः शास्त्रीयमूलानि विनष्टप्रायाणि भविष्यन्ति।

**प्राचीनकालः- :** ज्ञानविज्ञानयोः तार्किकतायाश्च स्वर्णयुगम् प्राचीनभारते संस्कृतं न केवलं सम्प्रेषणमाध्यमम् आसीत्, अपि तु समग्रस्य ज्ञानविज्ञानस्य, तार्किकचिन्तनस्य च सुदृढः आधारः आसीत्। तदानीन्तनं पठनपाठनं पूर्णतया वैज्ञानिकं तार्किकं च आसीत्:

**शास्त्रीयगम्भीरता-:** गुरुकुलपरम्परायां व्याकरण-न्याय-मीमांसा-वेदान्तादीनां शास्त्राणां गहनम् अध्ययनं भवति स्म। महर्षेः पाणिनेः 'अष्टाध्यायी' इव वैज्ञानिकं व्याकरणम् अस्याः भाषायाः गणितीयां तार्किकतां प्रमाणीकरोति।

**शास्त्रार्थपरम्परा-:** ज्ञानस्य परीक्षणं केवलं लिखितपरीक्षया वा कण्ठस्थीकरणेन न, अपि तु 'शास्त्रार्थ'माध्यमेन (तार्किक-वादेनैव) भवति स्म। अनेन विद्यार्थिनां मौलिकबोधः सुदृढः भवति स्म।

**बहुआयामी-उपयोगः-:** आयुर्वेदः, गणितं, खगोलविज्ञानं, वास्तुशास्त्रं च संस्कृते एव निबद्धानि आसन्। तदानीं संस्कृतं व्यावहारिकजीवनेन वैज्ञानिकशोधैश्च सह साक्षात् सम्बद्धम् आसीत्।

"स्थाणुरयं भारहारः किलाभूदधीत्य वेदं न विजानाति योऽर्थम्।" – यास्कमुनिः (निरुक्तम्)

**आधुनिककालः -:** उपाधिप्राप्तेः अन्धस्पर्धायां विस्मृतं मूलज्ञानम् अद्यत्वे देवभाषायाः स्थितिः नितान्तं शोचनीया सञ्जाता। उच्चशिक्षणसंस्थानेषु गम्भीरतायाः स्थाने औपचारिकता एव दृश्यते, यस्याः प्रमुखकारणानि इमानि सन्ति:। उपाधीनाम् अन्धस्पर्धाः साम्प्रतिके समये स्नातकोत्तर-अनुसन्धानादिकाः उच्चोपाधीः प्राप्यापि नैके विद्यार्थिनः संस्कृतस्य मूलभूतशास्त्राणां मौलिकबोधात् वञ्चिताः सन्ति। विद्यार्थिनः ज्ञानार्जनाय न, अपि तु केवलं प्रमाणपत्राणि प्राप्तुं संस्कृतं पठन्ति।

**मूलग्रन्थानां विस्मरणम्-:** महाभाष्य-काव्यादर्श-न्यायसूत्रादीनां मूलग्रन्थानां स्थाने सङ्क्षिप्तकुञ्जिकानां पठनं वर्धमानम् अस्ति। शास्त्रार्थस्य, सूत्रार्थस्य च सम्यग् बोधं विना केवलं कण्ठस्थीकरणेन भाषायाः जीवन्तता नष्टा भवति।

**वैज्ञानिकदृष्टिकोणाभावः-:** यद्यपि सङ्गणकविज्ञानाय संस्कृतं सर्वोत्तमा भाषा मन्यते, तथापि आधुनिकी संस्कृतशिक्षा तान्त्रिकज्ञानात् सर्वथा वञ्चिता अस्ति।

"पुस्तकस्था तु या विद्या परहस्तगतं धनम्। कार्यकाले समुत्पन्ने न सा विद्या न तद् धनम्॥"

## नीतिगतपरिवर्तनानां व्यावहारिक-सुधाराणां च आवश्यकता

संस्कृतस्य वास्तविकपुनरुत्थानाय केवलं भावावेशः पर्याप्तः नास्ति। शिक्षाविद्भिः, सर्वकारेण, समाजेन च मिलित्वा काचित् सुदृढा सुनियोजिता च रणनीतिः निर्मातव्या: मूलग्रन्थानां समावेशः सङ्क्षिप्त-अध्ययनस्य अथवा केवलम् अनुवादमाश्रित्य स्थितेः स्थाने पारम्परिकव्याकरणस्य, साहित्यस्य, दर्शनस्य च मूलग्रन्थान् पाठ्यक्रमेषु सर्वोच्चप्राथमिकता प्रदातव्या। प्रविध्या सह सङ्गमः संस्कृतं केवलं कर्मकाण्डाय सीमितं न कृत्वा, इदं आधुनिकानुसन्धानेन, आधुनिकभाषाविज्ञानेन , कृत्रिममेधया , अन्तर्जाल-सङ्गणक-प्रविध्या च सह संयोजयितुं महती आवश्यकता वर्तते। पारदर्शिता गुणवत्ता च अनुसन्धानप्रक्रियायां मौलिकतायाः, तार्किकतायाः च कठोरतापूर्वकं पालनं भवेत्। ये आचार्याः स्वयं शास्त्रेषु निष्णाताः सन्ति, तेषाम् एव नियुक्तिः भवेत्।

***"Sanskrit is the most computer-tractable language. Its rule-bound structure makes it perfectly suited for Artificial Intelligence." – Inspired by Rick Briggs (NASA Researcher, 1985)***

"ज्ञानं विज्ञानसहितं यज्ज्ञात्वा मोक्ष्यसेऽशुभात्।" – श्रीमद्भगवद्गीता

देवभाषायाः यथार्थं सम्मानं तदैव सम्भवति, यदा वयं प्राचीनकालस्य ज्ञानगाम्भीर्यम् आधुनिककालस्य प्रविधिकं विकासं च एकीकृत्य नूतनपद्धतिं स्वीकुर्मः।

---

# ॐ गीर्वाणवाणी सरस्वती
# भारती विश्ववन्द्या

ॐ गीर्वाणवाणी सरस्वती भारती विश्ववन्द्या
ॐ गीर्वाणवाणी सरस्वती भारती विश्ववन्द्या
ज्ञानगङ्गेयं गीयमाना गीतिषु लोकनन्द्या
ॐ गीर्वाणवाणी सरस्वती भारती विश्ववन्द्या ।००।
वैदिककालात् प्रवाहिता सुरभारती देवभाषा
अहो बहुसुन्दरसाधुविलक्षणप्रतिभान्विता ।१।
भाषैषा सरसा भाति नो जनमनोनुमोदिता
यस्मादेषा पूर्वपश्चिमोत्तरयाम्यदिशानुगता ।२।
सरलातिमनोज्ञा मधुरा गङ्गागोदाभ्यां प्लाविता
आभारतं सम्यक् विश्वस्यापि विश्वे सुविदिताऽऽदृता ।३।
संस्कृतभाषैषा भवत्यनवद्या अनिन्दिता
किल राजते श्रेष्ठातिश्रेष्ठा विशिष्टाऽऽह्लादिता ।४।
ज्ञानामृतस्य निधानं च वेदशास्त्रस्य बोधिनी
उपनिषद्भीतारत्नैः शोभिता विश्वमोहिनी ।५।
कालिदासभवभूत्यादिमहाकविभिः प्रपूजिता
वसुधैव कुटुम्बकम् इतीह भावनायां प्रतिष्ठिता ।६।
विज्ञानस्य सुसूक्ष्माणां विषयाणाम् इयमस्ति प्रचोदिनी
शान्तिसन्देशवाहिनी खल्वैषा नित्यं कल्याणकारिणी ।७।
ज्ञानगङ्गेयं गीयमाना गीतिषु लोकनन्द्या
गीर्वाणवाणी सरस्वती भारती विश्ववन्द्या
आं गीर्वाणवाणी सरस्वती भारती विश्ववन्द्या
ॐ गीर्वाणवाणी सरस्वती भारती विश्ववन्द्या
ॐ गीर्वाणवाणी सरस्वती भारती विश्ववन्द्या ।००।

**रचयिता- आचार्यः डॉ. रुरुकुमारमहापात्रः**
**राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः**

---

### १. देवभूमेः प्रतिष्ठा
देवभूमिः समाख्यातः प्रदेशोऽयं हिमाचलः।
संस्कृतेन विराजन्ते देवालयगणाः सदा॥

### २. द्वितीया राजभाषा
राजभाषा द्वितीया तु गीर्वाणभारती मता।
शासने व्यवहारे च गौरवं प्राप्यतेऽनया॥

### ३. मन्दिरेषु मन्त्रघोषः
मन्दिरेषु पवित्रेषु नित्यं मन्त्रध्वनिः श्रुतः।
संस्कृतेनैव सिद्ध्यन्ति पूजाहोमादिकाः क्रियाः॥

### ४. गुरुकुलपरम्परा
गुरुकुलेषु रम्येषु शैलेषु च तपोवने।
वेदाध्ययनशीलाश्च दृश्यन्ते बहवः शिष्याः॥

### ५. संस्कृतेः मूलम्
हिमाचलस्य संस्कृतिः संस्कृतेनैव रक्ष्यते।
संस्काराः विविधाः सर्वे भाषयैवानुगच्छिताः॥

### ६. ग्रामेषु प्रभावः
ऋषिसदृशाः जनाः सन्ति ग्रामेषु गिरिमण्डले।
सदाचारेण युक्तानां वाणी संस्कृतसङ्गता॥

### ७. ग्रन्थानां संरक्षणम्
अनेके प्राक्तनाः ग्रन्थाः ग्रन्थागारेषु रक्षिताः।
ज्ञानराशिः सुविस्तीर्णः हिमाचलसमाश्रितः॥

### ८. पर्वतानां पावनत्वम्
कैलासप्रमुखाः शृङ्गाः शिवस्य वासभूमयः।
संस्कृतश्लोकगीतैश्च गुञ्जन्ति गिरिकन्दराः॥

### ९. विद्यालयानां स्थितिः
विद्यालयेषु शास्त्रेषु संस्कृतं पाठ्यते शुभम्।
छात्रैः सम्भाषणं कृत्वा संवर्ध्यते महद् यशः॥

---






# होठां पुर अपणेयां....

होठां पुर अपणेयां खांड रख मितरा।
कन्ने कन्नै दिले बिच्च ठांड रख मितरा।।

सफरे दे रस्ते च देंदा लैंदा चल्लेयां ।
पिट्ठी पुर प्यारे वाळी पांड रख मितरा।।

बंडेया दा मिल्लदा ए इत्थे बी ते उत्थे बी।
भरी भरी मुट्ठियां दी छांड रख मितरा।।

जिंदगी री धार पैन्नी रक्खणी ता सुणी लै।
बणी ने लुहार थाप्प- चांड रख मितरा।।

जाह्नु जाह्नु मने तेरे जाग्गै अभिमान ता।
नजरां च सदा ब्रह्मांड रख मितरा।।

सब किच्छ उसदा ऐ शुक्रिया करा कर।
दिले किच्छा दूर तू घमंड रख मितरा ।।


अंदर ते बाह सदा इक्को मिक्क रक्खेयां।
दूर किरदार छा पाखंड रख मितरा।

अशोक दर्द गांव घाट डाकघर शेरपुर तहसील
डलहौजी जिला चंबा हिमाचल प्रदेश 176306

# "संस्कृत कथा मञ्जरी

## ।।द्वात्रिंशत्पुत्तलिकासिंहासनम्।।

## "अथ सर्व्वस्वदक्षिणायज्ञवर्णनं नाम तृतीयोपाख्यानम्"




पुनरपि राजा सिंहासने समुपवेष्टुं गच्छति, ततोऽन्या पुत्तलिका समवदत्- भो राजन्! एतत्सिंहासने तेनैव अध्यासितव्यं, यस्य विक्रमादित्यतुल्यमौदार्यमस्ति। भोजनोक्त- भो पुत्तलिके! कथय तस्यौदार्य्यवृत्तान्तम्। सा वदति- श्रूयतां राजन्! विक्रमार्कसदृशी राजा भूमण्डले नास्ति। यस्य चेतसि "अयं परः अयं मदीयः" इति विकल्पो नास्ति। उदारचेताः सकलमपि विश्वं पालयति। राजन्! यस्तु अर्थिनां मनोरथं पूरयति, तस्येप्सितं देवः सम्पादयति। एवं सकलगुणाधिवासः स विक्रमो राजा सर्वसम्पदा परिपूर्णः एकदा स्वमनसि अचिन्तयत्- अहो! असारोऽयं संसारः,कदा कस्य किं भविष्यतीति न ज्ञायते; यच्च उपार्जितं चित्तं; तदपि दानभोगैर्विना सफलं न भवति। अतो वित्तस्य सत्पात्रे दानमेकं फलम्; अन्यथा नाशमेव प्राप्नोति। इत्येवं विच्चार्य सर्व्वस्वदक्षिणं यज्ञं कर्तुम् उपक्रान्तवान्। ततः शिल्पिभिरतीव मनोहरो मण्डपः कारितः। सर्वाऽपि यज्ञसामग्री समाहृता; देव- मुनि- गन्धर्व- यक्ष- सिद्धादयश्च समाहूताः। तस्मिनवसरे समुद्राह्वानार्थं क्वचित् ब्राह्मणः समुद्रतीरे प्रेषितः। सोऽपि समुद्रतीरं गत्वा आसनादिषोडशोपचारं विधायाब्रवीत्- भो समुद्र! विक्रमार्को राजा यज्ञं करोति, तेन प्रेषितोऽहं त्वामाह्वातं समागतः इति जलमध्ये पुष्पाञ्जलिं दत्त्वा क्षण स्थितः। कोऽपि तस्य प्रत्युत्तरं न ददौ। तत उज्जयिनीं यावत् प्रत्यागच्छति, तावत् देदीप्यमानशरीरः समुद्रो ब्राह्मणरूपी सन् तमागत्य अवदत्- भो ब्राह्मण! विक्रमेण अस्मान् आह्वातुं प्रेषितस्त्वं, तर्हि तेन या अस्माकं सम्भावना कृता, सा प्राप्तैव। एतदेव सुहृद लक्षणं,यत् समये दानमानादि क्रियते। दूरस्थितानां मैत्री नश्यति, समीपस्थानां वर्धते इति न वाच्यम्;अत्र स्नेह एव प्रमाणम्। तस्मात् सर्वथा गन्तव्यं मे, किन्तु ममात्र किञ्चित् प्रयोजनमस्ति। तस्मै राज्ञे व्यर्थमेतद्रत्नचतुष्टयं ददामि। एतेषां माहात्म्यम्- एकं रत्नं यदस्तु स्मर्यते तद्ददाति; द्वितीयरत्नेन भोजनादिकम् अमृततुल्यमुत्पद्यते; तृतीयरत्नात् चतुरङ्गबलं भवति; चतुर्थाद्रत्नात् दिव्याभरणानि जायन्ते। तदेतानि रत्नानि गृहीत्वा राज्ञो हस्ते प्रयच्छ।

**डा. वर्षा प्रकाश टोणगांवकर**
**पुणे / महाराष्ट्रम्**



# संस्कृतभाषायाः

## वैज्ञानिकता, सर्वांगीणता च

**- गीता शुक्ला, उत्तर प्रदेशः**

संस्कृतभाषा भारतस्य प्राचीना समृद्धा सुव्यवस्थिता अस्ति। सा केवलं धार्मिकभाषा वा प्राचीनभाषा एव नास्ति, अपि तु वैज्ञानिकता, शुद्धता, स्पष्टता, तर्क शक्ति, ज्ञानसम्पदा च युक्ता सर्वांगीणा भाषा अस्ति। संस्कृतभाषायाः वैज्ञानिकस्वरूपं तस्याः विशेषं महत्त्वं वर्धयति। संस्कृतभाषायाः वर्णानाम् उच्चारणं स्पष्टं व्यवस्थितम् अस्ति।अस्याः वर्णमाला अपि वैज्ञानिक क्रमेण व्यवस्थिताऽस्ति। स्वराः व्यञ्जनानि च उच्चारणस्थानस्य अनुसारं क्रमबद्धानि सन्ति। कण्ठ्याः, तालव्याः, मूर्धन्याः, दन्त्याः, ओष्ठ्याः इति वर्णानाम् उच्चारणस्थानानि निर्धारितानि सन्ति। एतेन संस्कृतभाषायाः ध्वनिव्यवस्था अत्यंतं वैज्ञानिकं स्वरूपं प्राप्नोति। संस्कृतभाषायाः व्याकरणं सुव्यवस्थितं वैज्ञानिकं च अस्ति। महर्षिणा पाणिनिना रचिता अष्टाध्यायी संस्कृतव्याकरणस्य प्रसिद्धः ग्रन्थः अस्ति। अस्मिन् ग्रन्थे भाषायाः नियमाः सूत्ररूपेण वैज्ञानिकरीत्या प्रतिपादिताः सन्ति। संस्कृते शब्दनिर्माणस्य निश्चितनियमाः सन्ति। धातुभ्यः विभिन्नाः शब्दाः निर्मीयन्ते। विभक्तेः, वचनस्य, लिंगस्य च अनुसारं शब्दरूपाणि परिवर्तन्ते। अतः वाक्यानाम् अर्थः स्पष्टः भवति। संस्कृतभाषायां ज्ञानस्य विशालः भण्डारः अस्ति। वेदाः, उपनिषदः, रामायणम्, महाभारतं, भगवद्गीता, आयुर्वेदः, ज्योतिषं, दर्शनं, गणितं, व्याकरणम् इत्यादयः विविधाः, ज्ञानविषयाः, संस्कृतग्रन्थेषु प्राप्यन्ते। अतः संस्कृतभाषा केवलं पूजापाठस्य भाषा नास्ति अपितु साहित्यस्य, दर्शनस्य, विज्ञानस्य, चिकित्सायाः, गणितस्य, संस्कृते च समृद्धा भाषा अस्ति। संस्कृतभाषायाः अध्ययनं केवलं भाषाज्ञानं न ददाति अपि तु ज्ञानं, संस्कारं, तर्कशक्तिं, चिन्तनक्षमतां च वर्धयति। अस्यां भाषायां सरलता, शुद्धता, स्पष्टता च विशेषतया दृश्यते। प्राचीन- भारतीय- ज्ञानपरम्परायाः संरक्षणे संस्कृतभाषायाः महत्वपूर्णं योगदानम् अस्ति। अतः संस्कृतभाषा भारतस्य गौरवं अस्ति। सा ज्ञानस्य, संस्कृतेः, संस्कारस्य, विज्ञानस्य च भाषा अस्ति। तस्याः वैज्ञानिकता, सुव्यवस्था, विशालज्ञानसम्पदा च तां सर्वांगीणां भाषां करोति। अतः वयं संस्कृतभाषां पठेम, लिखेम, वदेम च, अस्याः गौरवपूर्णायाः परम्परायाः संरक्षणं च कुर्याम।



# संस्कृतं पठन्तु, राष्ट्रं वर्धयन्तु

संस्कृतं पठन्तु, राष्ट्रं वर्धयन्तु।
संस्कृतं वदन्तु, संस्कृतिं रक्षयन्तु।।
संस्कृतं चेद् विस्मृतं, विस्मृता संस्कृतिः।
संस्कृतेर्विना राष्ट्रस्य, का भवेत् प्रगतिः?
संस्कृत्या वर्धतां राष्ट्रं, वर्धतां च यशः।
संस्कृतं पठन्तु, राष्ट्रं वर्धयन्तु।
संस्कृतं वदन्तु, संस्कृतिं रक्षयन्तु।।
अज्ञातं संस्कृतं चेत्, अज्ञाता ग्रन्थरत्नाः।
येषु निहितं मूलं, संस्कृतेः महत्त्वम्।।
ज्ञानदीपं प्रज्वालयन्तु, तमसो निवारयन्तु।
संस्कृतं पठन्तु, राष्ट्रं वर्धयन्तु।
संस्कृतं वदन्तु, संस्कृतिं रक्षयन्तु।।
संस्कृतस्यानध्ययनेन, भ्रान्ता भवन्ति मानवाः।
मूलग्रन्थान् विस्मृत्य, यथेष्टं व्याख्यास्यन्ति।।
स्वसंस्कृतिं विजानीयुः, स्वगौरवं वर्धयन्तु।
संस्कृतं पठन्तु, राष्ट्रं वर्धयन्तु।
संस्कृतं वदन्तु, संस्कृतिं रक्षयन्तु।।
आगच्छन्तु मिलित्वा, संस्कृतं पठामः।
संस्कृतं वदामो नित्यं, संस्कृतिं रक्षामः।।
ज्ञानं यशश्च राष्ट्रस्य, विश्वे प्रसारयामः।
संस्कृतं पठन्तु, राष्ट्रं वर्धयन्तु।
संस्कृतं वदन्तु, संस्कृतिं रक्षयन्तु।।

**- डॉ. महिमा शुक्ला 'उत्तरायणी' उत्तर भारत:**

# वार्ता-संवादः

**हिमसंस्कृतवार्ताः, ईदरधीरजः**

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं व्याहरामि। नमस्ते काव्ये।

**काव्या-** नमस्ते नन्दिनि! चीनदेशे एका विचित्रा घटना दृष्टा अस्ति। एकः चालकः प्रमादात् यानस्य सामग्री-कोष्ठके स्वयमेव बद्धः जातः। तेन ध्वनियन्त्राय उच्चैः आदेशः दत्तः। अन्ते आरक्षकैः सः रक्षितः।

**नन्दिनी-** अहो! साक्षात् स्वयाने एव सः बद्धः, एतत् अतीव हास्यास्पदम्। मया अन्या वार्ता पठिता अस्ति। अन्तर्जाले एकेन जनेन "अष्टममासीय-पञ्चविंश-दिनाङ्कः" इति नाम्ना एका वञ्चना कृता। तेन बहुभ्यः जनेभ्यः रहस्यानावरणाय धनं सङ्गृहीतम्। ततः सः पलायितः।

**काव्या-** हा कष्टम्! अन्तर्जाले वञ्चकैः जनाः सुलभतया वञ्चिताः भवन्ति। परन्तु वैज्ञानिकैः एकं नूतनं शोधकार्यं कृतम्। तैः अवकर- प्लास्टिक- वस्तुभिः भक्ष्याणि निर्मितानि। इयम् अपि विस्मयकरी वार्ता मया श्रुता अस्ति।

**नन्दिनी-** प्लास्टिक-वस्तुना भक्ष्यं निर्मितम्! तत् श्रुत्वा एव वमनम् आगच्छति। अस्तु, केरलराज्ये अपि एका हास्यवार्ता प्राप्ता। एकेन चालकेन मार्गे एव यानं स्थापितम्। तत्र एव सः प्रसुप्तः जातः। अन्यैः जनैः सः बोधितः।

**काव्या-** अहो! मार्गे निद्रा कृता! एताः सर्वाः वार्ताः अतीव विचित्राः। धन्यवादाः नन्दिनि!

### हास्य-प्रसङ्गः १: औषधसेवनस्य रहस्यम्

**रोगी-:** भो वैद्यराज! एषा गुटिका कदा सेवनीया?

**वैद्यः-:** शयनात् प्राक् (सोने से पहले)।

**रोगी-:** किन्तु श्रीमन्, यदि निद्रा एव न आगच्छति, तर्हि किम् अहं रात्रौ जागरित्वा औषधस्य प्रतीक्षां कुर्याम्?

### हास्य-प्रसङ्गः २: जलस्य उपयोगः

**वैद्यः-:** भवान् दिने न्यूनातिन्यूनं दश लिटर-परिमितं जलं पिबेत्।

**रोगीः** (चिन्तितः भूत्वा) भो चिकित्सक! अहं तु मनुष्यः अस्मि, कूपः (कुआँ) वा तटाकः (तालाब) न!

### हास्य-प्रसङ्गः ३: पूर्वं शुल्कम्

रोगीः भो वैद्य! मम शिरोवेदना अधिका वर्तते, झटिति किमपि औषधं ददातु!

वैद्यः: प्रथमं मम शुल्कं (फीस) यच्छतु।

रोगीः किमर्थम् एतावत् शीघ्रम्?

वैद्यः: यतः मम औषधेन भवतः शिरोवेदना तु नश्येत्, किन्तु शुल्कं दृष्ट्वा मम शिरोवेदना मा भवतु!